पुणे-विद्यापीठस्य प्रगत-संस्कृत-केन्द्रम्



चन्द्रसेनः

हॅम्लेट्-नाटकस्य संस्कृतावतारः

शि. द. जोशी

विघ्नहरि देव

Publications of the Centre of Advanced Study in Sanskrit

Class G **No. 1**

CANDRASENAḤ DURGADEŚASYA YUVARĀJAḤ

(Sanskrit Adaptation of Shakespeare's HAMLET, the Prince of Denmark)

by

S. D. JOSHI

&

VIGHNAHARI DEO

UNIVERSITY OF POONA

PUNE

1980

FIRST EDITION : 1980

© *With Publisher*

Published by Shri S. P. Bhosale, Registrar, University of Poona, Ganeshkhind, Pune-411 007.

Printed by Shri Y. G. Joshi, at Anand Mudranalaya, 1523, Sadashiv Peth, Pune-411 030.

(500-1-1980)

Foreword

It has been the dream of the academic world of the Universities teaching Sanskrit to see the plays of Shakespeare worded in the language of Bhāsa, Bhavabhūti and Kālidāsa. This long-cherished dream of students and scholars alike is coming true. Prof. S. D. Joshi and Pt. Vighnahari Deo have placed in their hands Shakespeare's **Hamlet** in chaste and simple Sanskrit.

In recent times **Hamlet** has become one of the most popular plays of Shakespeare. It is certainly one of the most difficult, and Shakespeare is at his best in his **Hamlet**. Hence, the reader must appreciate the arduous nature of the task of rendering this play into Sanskrit, a task in which the authors have succeeded to a remarkable degree. They have produced a highly readable rendering.

Any modern translation of a classical work is, to some extent, interpretative. Besides, it is bound to be, an adaptation if the attempt is to 'translate' it into the ancient and hallowed cultural imagery and idiom of a language like Sanskrit. The authors have not merely translated **Hamlet,** but have interpreted and adapted it anew. It is presented in the proper form fitting Sanskrit dramaturgy and literature. Still, *Candrasenaḥ* is as close and faithful to Hamlet as has been possible to make him.

A Sanskrit drama without songs is unthinkable. Ophelia's songs have been rendered here in fresh compositions as well

as in borrowings from well-known classics to convey the idea and create an authentic atmosphere.

The authors must be congratulated for these achievements, knowing as we do, how difficult a play in the original is. I hope they will continue their literary activity and blaze the path for others to follow, so that Sanskrit may be blessed with more and more popular works and new writers.

Vice Chancellor,
University of Poona.
January 15, 1980

R. G. Takwale.

-

नवपरिणीतौ

प्रस्तावना

कविकुलशिरोमणेः शेक्स्पअर्-महाभागस्य कृतिषु मूर्धाभिषिक्तं 'हॅम्लेट्-' संज्ञकं नाटकम्। तद्धि जगतीतले सर्वेषां रसिकानां चिरपरिचितम्। डेन्मार्क-देशस्य तत्त्वान्वेषहतो युवराजः 'हॅम्लेट्', अस्य नाटकस्य नायकः। तत्पिता अकस्मात् सर्पदंशेन मृतः, माता पितृव्येण परिणीता, नवौ दम्पती ऐहिकान् भोगान् भुञ्जानौ राज्यसुखम् अनुभवतः स्म। किमिदं संजातम्, कथमिदं संजातम्, इति अजानन् दिङ्मूढोऽभूत् युवराजः। अत्रान्तरे पितृवेषधारी पिशाचः स्वयमेव आविर्भूय निखिलं वृत्तान्तं युवराजाय न्यवेदयत्, 'यः कृष्णसर्पः मामदशत्, स एव तव मातरं भ्रंशयित्वा मम सिंहासनमध्यास्ते; तं निहत्य तद्रुधिरेण मां संतर्पय' इति। परं सत्यम् असत्यं वा पिशाचभाषितम्, इति विचारमूढो युवराजः, पितृव्यो वस्तुत एव तातघातको न वा, इति निर्णेतुं नाशकत्। अत्रान्तरे दुर्गदेशं समागतेभ्यः कुशीलवेभ्यः पितृवधानुकारि 'मातङ्गवधम्' नाम नाटकं प्रयोक्तुमादिशत्। छायानाटके पितृव्यस्य मुखविकारं निर्वर्ण्य अयमेव तातघातकः, इति प्रत्ययः तस्य उदभूत्। प्रबलं प्रमाणमुपलभ्यापि दिङ्मूढेन कुमारेण आकुलक्षयं नानुष्ठितः पितुः संदेशः।

किं कर्म, किम् अकर्म इति अव्यवसायिनो युवराजस्य विचारमूढतां चित्रयत् इदं नाटकं निखिलेऽस्मिन् भुवने सहृदयानां चेतांसि शतकानि यावत् आवर्जयति। महतां तत्त्वान्वेषः परिणामे भयंकरः, इति इदं विश्वजनीनं सत्यं नाट्येन रसभाव-समुज्ज्वलं कृत्वा अपूर्वं कौशलम् आविष्कृतं महाकविना शेक्स्पअर्-महाभागेन।

प्रायेण सर्वासु शिष्टभाषासु अस्य नाटकस्य अनुवादा रङ्गावृत्तयश्च संपादिता वर्तन्ते। मराठी-भाषायाम् अस्य नैकानि रूपाणि अवतीर्णानि, येषु श्रीमतां गोपाळ गणेश आगरकर इत्येतेषां 'विकारविलसितम्' मूर्धन्यायते। संस्कृत-भाषायामपि सुखमय-मुखोपाध्यायैः इदं नाटकं 'दीनार्कराजकुमारहेमलेखम्' इति नाम्ना पूर्वमेव अनूदितम्। परं प्रामाणिकोऽपि अयम् अक्षरानुगुणः अनुवादः सामाजिकानां हृदयानि हर्तुं न क्षमते। संस्कृतज्ञोऽपि रसिकः महान्तं क्लेश-

मनुभवति अस्य अनुवादस्य पठने । प्रतिशब्दजटिलोऽयमनुवादः कथं नाम प्रयोगनिकषमवतरेत्, इत्यपि बलवती नः शङ्का ।

परं नायं मुखोपाध्यायानां दोषः । अतिदुष्कर एव अस्य नाटकस्य अनुवादः । हॅम्लेट्-नाटकस्य कथावस्तु पाश्चात्यम्, तत्रत्ये नामरूपे डेन्मार्कगते, तत्र प्रतिविम्बितं लोकचरितम्, आचारविचाराः, लोकरूढयः, अन्तःकरणप्रवृत्तयः, समाजधर्माः, राज्यव्यवहाराः, सर्वम् आङ्ग्लं वर्तते । एतत् सर्वं वर्णयितुं नास्ति पर्याप्ता शब्दसंपत् संस्कृतसारस्वते । काममस्तु अनितरसाधारणं सामर्थ्यं संस्कृतस्य शतशः शब्दान् निर्मातुम् । परम् अप्रयुक्तपूर्वा इमे नूतनाः शब्दा न प्रभवन्ति वक्तुरभिप्रायं यथार्थतः प्रकाशयितुम् । सति प्रसङ्गे रसहानिमपि कुर्वन्ति । प्रेक्षका अपि नाभिनन्दन्ति क्रमेलकगतमिव विसंष्ठुलम् अक्षरानुगुणमनुवादम् । अतः मूलस्य अनुवादः न शब्दानुसारेण परं भावानुसारेण कर्तव्यः, इति अस्माभिर्निर्णीतम् । तद् आङ्ग्लं नेपथ्यमवतार्य भारतीयेन वस्त्रप्रावरणेन प्रसाधितोऽयं चन्द्रसेनः । भारतीयानि स्थलपुरुषनामानि, भारतीयसंस्कृतौ रूढा आचाराः, भारतीयानामेव पुराणकथा अनुवादे स्थाने स्थाने निवेशिताः । शवस्य भूमिनिक्षेपः चितासंस्कारे परिवर्तितः, फ्रान्सविद्यापीठस्य कौण्डिन्याश्रमः कृतः, ख्रिस्तानां प्रभुः शिवरूपेण दर्शितः, दुर्गे दुर्गादेवी अभिषिक्ता, सार्वपित्री अमावास्या, मणिकर्णिका(गङ्गा), तिलाञ्जलिः, निवापाञ्जलिः, पिण्डप्रदानम्, लाजहोमः, पितृसूक्तं, करालवदना चामुण्डा, अभद्रदर्शन उलूकः, इत्यादिकं स्थले स्थले प्रस्तुतम् । एवं बहूनि परिवर्तनानि कृत्वाऽपि संस्कृते शेक्स्पिअरकृतेः आत्मा यथा अविनाशी विराजेत, तथा प्रयतितम् । क्वचिद् रसहानिं परिवर्जयितुं भारतीयरूढिमुपेक्ष्य राज्ञी अपि श्मशानं प्रापिता ।

संक्षेपतः, नायमनुवादः शेक्स्पिअरकृतेः, परं नूतन एव भारतीयः अवतारः हॅम्लेट्-नाटकस्य । मूलं कथावस्तु अपरिवर्त्य संस्कृतशैल्या प्रस्तुतोऽयं 'दुर्गदेशस्य युवराजः' राजा प्रजानुरञ्जनमिव रसिकरञ्जनं कुर्यात्, इति अस्माकं द्रढीयान् विश्वासः ।

तथैव दीर्घदीर्घतराणि स्वगतानि, अतिविस्तृताः, क्वचिद् दुर्बोधाः काव्यबन्धाः, मानसव्यापाराणां पाण्डित्यपूर्णं व्याकरणम्, इत्येते कतिचिद् सहजा विशेषाः हॅम्लेट्-नाटकस्य । अद्यत्वे इदं सर्वम् आस्वादयितुं नास्ति समयः न वा सामर्थ्यं

संक्षेपरुचेः रसिकस्य । सर्वं लघुसंदेशपदं, सुबोधम्, अनतिदीर्घं भवतु, इति महानाग्रहः आधुनिकानां नाट्याचार्याणाम् । अतः कथावस्तुना साक्षादसंबद्धानंशान् उत्सृज्य, दीर्घतराणि भाषणानि संक्षिप्य, पुनरुक्तीः परिहृत्य प्रयोगानुगुणा संपादितेयं रङ्गावृत्तिः ।

वस्तुतः क्व वश्यवाग् महाकविः, क्व च परोक्षसारस्वता वयम्? नास्ति अस्माकं कविप्रतिभा, न वा परिनिष्ठितं ज्ञानं संस्कृतसारस्वतस्य । शब्दकोशस्य नौकामारुह्य कथमपि हॅम्लेट्-महोदधेः परं पारं संप्राप्ता वयम् । परं तस्य आपातलगभीरतां वेदितुं नास्ति अस्माकं बुद्धिविभवः, इति प्रकाशयतां नास्ति मनागपि नः संकोचः ।

पुणे-विद्यापीठस्य कुलगुरुभिः डॉ. रामचन्द्र ताकवले-महाभागैः हॅम्लेट्-नाटकस्य अनुवादे वयं प्रोत्साहिताः। आमुखं (foreword) लिखित्वा अभिनवे संस्कृतसाहित्ये स्वस्य हार्दः अनुरागः प्रकटितः; अतः तान् प्रति कृतज्ञतां प्रकाशयामः । 'चन्द्रसेन'स्य संहिताम् अक्षराङ्कितां (stencil) कृत्वा डॉ. प्रतिभा गोखले, डॉ. वसन्त झांबरे, डॉ. इन्दुमती देशपाण्डे, सौ. सरोज देशपाण्डे इत्यादिभिः यत् साहाय्यमाचरितं, तत् न कदापि विस्मर्तुं शक्नुमः । डॉ. ग. वा. पळसुले, डॉ. पु. द. नवाथे, इत्याभ्यां व्याकरणचक्षुषा, वृत्तचक्षुषा च निरीक्ष्य, संहितायां कतिचिद् अशुद्धानि प्रदर्शितानि; अतः तेषाम् आधमर्ण्यं धारयामः । डॉ. जे. ए. एफ. रूडवर्गन्, श्री. एस्. जे. कॅरी इत्येताभ्यां मूलस्थानि विषमस्थलानि विवृतानि । आनन्द-मुद्रणालस्य श्री. य. गो. जोशी-महाभागैः सप्ताहत्रये एव निर्दुष्टं मुद्रापितः '**चन्द्रसेनः, दुर्गदेशस्य युवराजः**' । श्री. गो. म. वाटवे-महोदयैः मूलकवेः चित्रमुद्रां प्रदाय प्रसाधितं मण्डनं 'युवराजस्य' । तदर्थं तान् सर्वान् प्रति साधुवादान् उदीरयामः ।

पुणे-विद्यापीठस्य
प्रगत-संस्कृत-केन्द्रम्,
१५ जानेवारी, १९८०

शि. द. जोशी
विघ्नहरिः देवः

पात्रवर्गः (प्रवेशक्रमेण)

बिम्बम्	प्रतिबिम्बम्
Barnardo :	दमनकः } यामिकाः ।
Francisco :	पिङ्गलकः } यामिकाः ।
Marcelus :	मकरन्दः } यामिकाः ।
Horatio :	हर्षनादः – चन्द्रसेनस्य वयस्यः ।
The ghost :	पिशाचः – कर्णे विषं निषिच्य हतः, पिशाचयोनिम् अनुप्रविष्टः, दुर्गदेशस्य महाराजः महेन्द्रवर्मा, चन्द्रसेनस्य पिता ।
Claudius :	राजा – चण्डवर्मा, महेन्द्रवर्मणः घातकः, चन्द्रसेनस्य पितृव्यः ।
Polonius :	शालेयः – राज्ञः अमात्यः, ललाटमल्लिकयोः पिता ।
Laertes :	ललाटः – अमात्यशालेयस्य पुत्रः ।
Hamlet :	चन्द्रसेनः – दुर्गदेशस्य युवराजः (कुमारः), हतस्य राज्ञो महेन्द्रवर्मणः सूनुः, नाटकस्य नायकः ।
Gertrude :	राज्ञी – वसुमती, आदौ महेन्द्रवर्मणः, अनन्तरं चण्डवर्मणः पत्नी, दुर्गदेशस्य सम्राज्ञी, चन्द्रसेनस्य माता ।
Ophelia :	मल्लिका – अमात्यशालेयस्य दुहिता, चन्द्रसेनस्य प्रिया, नाटकस्य नायिका ।
Reynaldo :	वर्धनकः – ललाटस्य वृत्तं परीक्षितुं शालेयेन प्रेषितो दूतः ।
Rosencrantz :	मञ्जुलः } चन्द्रसेनस्य उन्मादरहस्यं वेदितुं राज्ञा आदिष्टौ, कुमारस्य सब्रह्मचारिणौ ।
Guildenstern :	वञ्जुलः } चन्द्रसेनस्य उन्मादरहस्यं वेदितुं राज्ञा आदिष्टौ, कुमारस्य सब्रह्मचारिणौ ।
Ambassador :	राजदूतः – ताम्रदेशं प्रेषितः राजदूतः ।

बिम्बम्	प्रतिबिम्बम्
Players :	कुशीलवाः –
	चन्द्रकेतुः – नटः, नाट्याचार्यः ।
	भारद्वाजः – नटः, गायकः ।
	मेनका – नटी ।
Player king :	मातङ्गराजः – छायानाटकस्य नायकः ।
Player queen :	चञ्चला – छायानाटकस्य नायिका ।
Lucianus :	उग्रवर्मा – मातङ्गराजस्य भ्रातृव्यः ।
Clowns :	अस्थिहरः, चिताकरः } श्मशानसेवकौ ।
Orsic :	श्वपतिः ।
	दूतः, पुरोहितः, मध्यस्थः, द्वारपालः, सैनिकाः, अन्ये च ।

• • •

चन्द्रसेनः, दुर्गदेशस्य युवराजः ।

चन्द्रसेनः, दुर्गदेशस्य युवराजः

प्रथमोऽङ्कः ।

प्रथमः प्रवेशः ।

(दुर्गस्य पश्चिमद्वारम्, द्वौ यामिकौ ।)

दमनकः – अरे कोऽत्र यामिकः ?

पिङ्गलकः – तिष्ठ भोः देहि मे प्रतिवचनम् । कस्त्वम् ?

दमनकः – चिरं जीवतात् महाराजः ।

पिङ्गलकः – अपि दमनकः ?

दमनकः – आम् दमनकः ।

पिङ्गलकः – समये समागतोऽसि ।

दमनकः – अर्धम् अतीतं रात्रेः । तद् गच्छ । स्वपिहि ।

पिङ्गलकः – दिष्ट्या मोचितोऽस्मि । कष्टबहुलं हि इदं रक्षाकार्यम् । शीतेन आर्तोऽस्मि ।

दमनकः – अपि निर्विघ्नस्ते नियोगः ?

पिङ्गलकः – सर्वथा निर्विघ्नः । मूषकोऽपि न दृष्टः ।

दमनकः – कथं चिरयति हर्षनादः ? त्वरितं प्रेषय तम् ।

पिङ्गलकः – अरे कस्यचित् पदशब्दः श्रूयते । तिष्ठ । भोः कस्त्वम् ?

(ततः प्रविशति हर्षनादः मकरन्दश्च ।)

हर्षनादः – आवां दुर्गराजस्य सेवकौ ।

पिङ्गलकः – स्वागतं युवयोः ।

मकरन्दः – नमो नमः ।

पिङ्गलकः – मकरन्द अनुजानीहि मां गमनाय ।

मकरन्दः – भद्र, कस्तव स्थाने नियुक्तः ?

पिङ्गलकः – दमनकः । स्वस्ति अस्तु वः । गच्छामि ।

दमनकः – अपि समागतः आर्यो हर्षनादः ?

हर्षनादः – अयमहं भोः ।

मकरन्दः – का वार्ता दुर्गे ? अपि दृष्टः स पिशाचः अद्य ?

दमनकः – (अभितो दृष्ट्वा) न किमपि दृष्टं मया ।

मकरन्दः – आर्यो हर्षनादो वदति, केवलं मतिभ्रमः अयम् । परम् आवाभ्यां द्विवारं साक्षात्कृतः स पिशाचः । आर्यः पुनः उपहसति आवाम् । अतो मया प्रार्थितः आर्यः, स्वयमेव आगन्तव्यम्, दृष्ट्वा च निर्णेतव्यम्, किमयं भूतार्थः उत मतिभ्रमः । यदि आविर्भवति पिशाचः प्रष्टव्यः सः, किमथ संचरसि कराले अर्धरात्रे इति ।

हर्षनादः – भीरुं भीषयति पिशाचः, न धीरम् । कथं खलु संभवेदत्र पिशाचः ? सर्वं मनोविलसितमेतत् ।

दमनकः – शृणोतु तावदार्यः । द्विवारं यत् मया दृष्टं तत् निवेदयामि ।

हर्षनादः – शृणुमस्तावत् । कथय यथाभूतं वृत्तान्तम् ।

दमनकः – ह्यः किल रात्रौ....पश्य....

हर्षनादः (सचकितम्) किम् ?

दमनकः – पश्य ध्रुवस्य पुरतः विद्योतमानं नक्षत्रम् । गतायां रात्रौ अस्मिन्नेव अवसरे, अस्मिन् नक्षत्रे नभसि प्रकाशमाने, (नेपथ्ये प्रहरघण्टा ।) एवमेव घण्टा निनादिता यामिकेन । ततः सपदि....

मकरन्दः (सभयम्) – तूष्णीं तिष्ठ । अयं समागतः ।

दमनकः – ज्येष्ठराजेन सदृशम् अस्य रूपम् ।

(ततः प्रविशति दक्षिणेन पिशाचः ।)

मकरन्दः – आर्य, धीरस्त्वम् । तत् पृच्छ एनम्, 'कस्त्वम् ? किमर्थम् अत्र संचरसि' ?

(हर्षनादः स्तिमितः पश्यति ।)

मकरन्दः – अपि लब्धः प्रत्ययः ? किं नायं ज्येष्ठराजेन सदृशः ?

हर्षनादः – (सकम्पम्) सत्यमाह भवान् । भोः अदृष्टपूर्वमेतत् । भयेन कम्पते मे शरीरम् ।

दमनकः – नूनं स वक्तुकामः ।

मकरन्दः – हर्षनाद, पृच्छ एनम् ।

हर्षनादः – अयि भोः कस्त्वम् ? किमर्थम् अस्मिन् घोरे निशीथे ज्येष्ठराजस्य

कवचं धारयन् शस्त्रपाणिः इह संचरसि ? ब्रूहि कस्त्वम् ? देवतया शापितोऽसि यदि आत्मानं न प्रकाशयसि ?

मकरन्दः – कुपित इव लक्ष्यते।

हर्षनादः – तिष्ठ रे रात्रिंचर तिष्ठ। ब्रूहि कस्त्वम् ? अनुक्त्वा स्ववृत्तान्तं न युज्यते तव तिरोधानम्। (निष्क्रान्तः पिशाचः।)

मकरन्दः – प्रतिवचनं अदत्त्वैव निष्क्रान्तः।

दमनकः – आर्य हर्षनाद, पूर्वं मतिभ्रम इति मां परिहसितोऽसि। अधुना भयकम्पितानि ते गात्राणि।

हर्षनादः – को नाम प्राज्ञः विश्वस्यात् ईदृशे पिशाचवृत्तान्ते ? परं चक्षुर्वै सत्यमेतत्। अतः न शक्नोमि निराकर्तुम्।

मकरन्दः – किं नास्ति ज्येष्ठराजसदृशम् अस्य रूपम् ?

हर्षनादः – अथ किम् ? यथा अहम् आत्मना सदृशः तथैव अयं ज्येष्ठराजेन सदृशः। अहो आश्चर्यम्।

(पुनः प्रविशति पिशाचः।)

हर्षनादः – रे तूष्णीं तिष्ठ। पश्य पुनरागतः। अधुना अहमेव तं शब्दापयामि। तिष्ठ रे रात्रिंचर तिष्ठ। यदि पूर्वसंस्कारेण वक्तुं प्रभवसि तर्हि कथय आत्मनः पूर्व वृत्तान्तम्। अकार्यं वर्जयित्वा यत् ते रोचते तत् सर्वं विधास्यामि। यदि दिव्येन चक्षुषा दुर्गदेशस्य भाविनम् अनर्थं पश्यसि, तर्हि कथं स प्रतिकर्तव्यः तदपि वद। अथवा कथय किं त्वया परस्वम् अपहृत्य भूमौ निहितम् ? एतदर्थं किल सत्त्वानि प्रेत्य पुनः भुवि संचरन्ति।

(नेपथ्ये कुक्कुटरुतम्। पिशाचः प्रतिष्ठते।)

मकरन्दः – अरे तिष्ठ। प्रतिनिवर्तस्व। नो चेत् शूलेन त्वां प्रहरामि।

हर्षनादः – कामं प्रहर यदि न निवर्तते। (मकरन्दः प्रहरति।) कथं गत एव सः ?

मकरन्दः – पश्य इतस्तिरोभूय इह समागतः। पश्य एष सः। अरे इतोऽपि नष्टः। हन्त पापम्। ज्येष्ठराजसदृशम् आकृतिविशेषं प्रहर्तुम् उद्यता वयम्। नैतदुचितं राजपरिजनस्य। अथवा वायवीयं पिशाचशरीरम्। न प्रभवति शस्त्रम् अस्मिन्।

स किमपि वक्तुकामः आसीत् । अत्रान्तरे कुक्कुटरुतमभूत् ।

दमनकः – तत्क्षणमेव वेदमन्त्रं श्रुत्वा ब्रह्मराक्षस इव स पिशाचः कुक्कुटरुतं श्रुत्वा पलायितः ।

हर्षनादः – कुक्कुटो हि प्रत्यूषसि तारस्वरेण भगवन्तम् आदित्यं प्रबोधयति । तच्छ्रुत्वा वनदेवताः निद्रां त्यक्त्वा संचरन्ति । भूतप्रेतपिशाचास्तु संचारं परित्यज्य रौरवे निलीयन्ते । अनेन पिशाचदर्शनेन बलवद् अस्वस्थोऽस्मि । किमपि अनिष्टम् आशङ्के दुर्गदेशस्य । अयि दुर्गे संरक्ष इमं दुर्गदेशं भाविनः अनर्थात् ।

मकरन्दः – हर्षनाद, अयं वृत्तान्तः कुमाराय चन्द्रसेनाय अवश्यं निवेदनीयः । कस्ते अभिप्रायः ?

हर्षनादः – साधु । सदृशमेतत् मित्रभावस्य । अन्यच्च, अस्मासु मौनं भजमानोऽपि पिशाचः नूनं कुमाराय सर्वं रहस्यं प्रकाशयेत् ।

मकरन्दः – तदेहि । अद्यैव कुमारं द्रक्ष्यावः । (निष्क्रान्ताः सर्वे ।)

द्वितीयः प्रवेशः ।

(दुर्गस्था राजसभा । ततः प्रविशन्ति राजा, राज्ञी, चन्द्रसेनः, शाल्यः ललाटः, राजपुरुषाः, सामन्ताश्च ।)

राजा – राजकार्यदक्षाः सामन्ताः मन्त्रिणश्च, विदितमेव सर्वेषां यद् अस्माकं ज्येष्ठो भ्राता पुण्यश्लोकः महेन्द्रवर्मा सर्पदंशेन एकपदे दिवं गतः । ततः प्रभृति दुर्गदेशस्य प्रजाः शोकसागरे निमग्नाः । वयमपि दुःखाकुलाः शोकभारं लघूकर्तुम् अक्षमाः । परं किं कर्तव्यम् ? अनुपेक्षणीयो हि राजधर्मः । अतः दुस्तरमपि शोकसागरम् उत्तीर्य गुर्वीं राजधुरां वोढुम् अनिच्छया संनद्धाः स्मः । यथाविधि प्रजाः पालयितुं भूतपूर्वां भ्रातृजायां परिणीय, तया सार्धं महेन्द्रवर्मणा अधिष्ठितं सिंहासनं वयं समारूढाः । अतःपरम् इयम् अस्माकं सहधर्मचारिणी दुर्गदेशस्य सम्राज्ञी संवृत्ता । अद्य विवाहमङ्गलं बिभ्रताम् अस्माकं मनः सममेव संकुलं हर्षविषादाभ्याम् । धर्म्येण विधिना प्रजाः पालयितुं नियतो हि दारपरिग्रहो राज्ञाम् । अतः राजकार्यधुरन्धरैः मन्त्रिभिः

अभिनन्दिता वयम् । परं महाराजस्य महेन्द्रवर्मणः अकालनिधनेन दुर्बलं दुर्गराज्यम् इति मत्वा ताम्रदेशस्य राजपुत्रेण परशुधरेण अस्माकं मानभङ्गाय अवज्ञाकरः लेखः प्रेषितः । महेन्द्रवर्मणा बाहुयुद्धे जिताः सर्वे भूप्रदेशाः सत्वरं प्रत्यर्पणीयाः इति स आदिशति । तस्य मदोद्धतस्य दर्पशातनं कर्तुं वयं बद्धपरिकराः । न कदापि सामन्तात् परिभवं सहन्ते सार्वभौमाः इति विज्ञापनीयः परशुधरः । सामन्ताः मन्त्रिणश्च भवन्तोऽपि सर्वे स्वकार्यं सावधानम् अनुतिष्ठन्तु । सर्वेषां सहयोगेन बलिष्ठं भवतु दुर्गराज्यम् । अभिवर्धतां दुर्गदेशः । अभिवर्धन्तां पौरजानपदाः ।

सर्वे – अभिवर्धतां महाराजाधिराजः चण्डवर्मा ।

(सर्वे प्रणम्य निष्क्रान्ताः ।)

अमात्यः – देव, मम पुत्रः भवन्तं किमपि वक्तुमिच्छति ।

राजा – ललाट कथय किं ते मनसि ? त्वं हि खलु राजकार्यनिपुणस्य अमात्यस्य पुत्रः । अतः तव प्रार्थना न कदापि मोघा भविष्यति । तत् कथय ।

ललाटः – देव, महाराजस्य राज्याभिषेकसमये, राजनिष्ठां प्रकाशयितुं गुरुकुलात् समागतोऽस्मि । अधुना कृतकार्यः पुनरपि काम्पिल्यनगरं गन्तुमिच्छामि । न सहते अध्ययनप्रत्यूहं महर्षिः कौण्डिन्यः । तदनुजानातु मां देवः ।

राजा – कथं वा मन्यते शालेयः ?

शालेयः – देव, दुःसहोऽयम् अपत्यवियोगः । परम् अध्ययनप्रत्यूहो मा भूत् इति कथमपि अनुज्ञातो गमनाय । अतःपरं देव एव प्रमाणम् ।

राजा – ललाट स्वस्थेन मनसा गच्छ । शिवास्ते सन्तु पन्थानः ।

(निष्क्रान्तौ ललाटशालेयौ ।)

राजा (चन्द्रसेनम् अवलोक्य) – अपि कुशलं भ्रातृजस्य चन्द्रसेनस्य ? अथवा कुमारं प्रति सुत इत्येव व्यवहारः शोभते अस्माकम् ।

चन्द्रसेनः (स्वगतम्) – अहो बिभेमि । अतिस्नेहः शङ्कनीयः ।

राजा – वत्स चन्द्रसेन, किमिति अद्यापि शोकाकुलं ते मुखम् ?

चन्द्रसेनः – ईदृशे पितृवात्सल्ये कुतः शोकस्य अवसरः ?

राज्ञी – वत्स मुञ्च शोकम् । एकवारम् अवलोकय अस्मान् आनन्दपूर्णेन चक्षुषा । कियन्तं खलु कालं पितरम् अनुशोचसि ? यावदयं संसारः तावत् अपरिहार्य

प्राणिमात्रस्य मरणम्।

चन्द्रसेनः – सत्यमेतत्।

राज्ञी – यदि एवम्, कुतोऽयम् अपूर्वस्ते शोकाविष्कारः ?

चन्द्रसेनः – अम्ब नेदं शोकप्रदर्शनम्। मलिनं वासः, अश्रुपरिप्लुते नत्रे, दीना मुद्रा, दीर्घमुष्णं निःश्वसितम्, इति नैतत् शोकस्य वास्तवं स्वरूपम्। किन्तु शोकस्य केवलं नेपथ्यम्। शोकं विनाऽपि एतत् कर्तुं शक्यते। परं दुर्वहं खलु मे आन्तरं दुःखम्। अयं हृदिस्थः शोकाग्निः सततं मां संतापयति।

राजा – वत्स, दृढा ते भक्तिः पितरि। परं न युक्तम् अपरिहार्ये वस्तुनि शोचितुम्। अवलोकयतु तावद् वत्सः, यथा तव पिता उपरतः, तथैव तव पितामहः प्रपितामहोऽपि उपरतः। कंचित् कालं सर्वे एव मृतं पितरम् अनुशोचन्ति। स्वाभाविकमेतत्। परं न शोभते ईदृशी शोकपरवशता भवादृशाम्। नैतदनुरूपं युवराजस्य। युक्तं हि हृदयदौर्बल्यम् अप्रबुद्धानाम् न पुनः अधीतविद्यानाम्। अतः शोकावेगं नियम्य अवेक्षस्व राजकार्यम्। अहं ते पितृस्थानीयः। उपरते मयि दुर्गदेशस्य राजलक्ष्मीः त्वामेव अनुगमिष्यति। .... अधुना न ते किंचित् साध्यं गुरुकुलं गत्वा। अतः अस्माभिः साकं इहैव राजमन्दिरे स्थातुमर्हसि। त्वं हि अस्माकं प्रिय आत्मजः, नयनमहोत्सवः।

राज्ञी – वत्स चन्द्रसेन, न पितुः प्रणयं विहन्तुमर्हसि। तदिहैव तिष्ठ।

चन्द्रसेनः – अनुल्लङ्घनीया हि गुरूणाम् आज्ञा।

राजा – साधु चन्द्रसेन साधु। सदृशमेतत् पुत्रभावस्य। प्रीताः स्मः अनेन प्रतिवचनेन। देवि, साधयामस्तावत्। हन्त लब्धमिदानीं स्वास्थ्यम्। तत् अद्य रात्रौ इममानन्दं पानोत्सवेन संमानयामः। (चन्द्रसेनं विहाय सर्वे निष्क्रान्ताः।)

चन्द्रसेनः – (स्वगतम्) अहो कुतो न विशीर्यते अयं मांसपिण्डः ? प्रभो वृथैव त्वया प्रतिषिद्धः आत्मघातः। हन्त दुःखोऽयं लोकव्यवहारः। असारमिदं जीवितम्। धिगिमं संसारतरुं यं विषलताः परिवेष्टयन्ति। अहो कोऽयमनर्थः ? अतीतं मासद्वयम् उपरतस्य तातस्य। कुतो मासद्वयम् ? ततोऽपि अवरम्। क्व स उदारचरितो राजर्षिः, क्व चायम् अभद्रदर्शनः उलूकः। एकः तेजस्वी भास्करः, अपरः मलीमसो राहुः। मम माता च प्राणेभ्योऽपि गरीयसी तातस्य।

मलयमारुतेनापि दूयेत शिरीषपेलवं तदङ्गम् इति तातः सततं शङ्कते स्म। इयं च क्षणमपि तद्वियोगम् असहमाना सततं कण्ठलग्ना अभूत्। परं यं वृक्षमाश्रित्य परिपुष्टा इयं लता, उन्मूलितमात्रे तस्मिन्.... अहह कष्टम्। स्वभावचपलाः स्त्रियः। मासात् पूर्वं या सोरस्ताडमाक्रोशन्ती मणिकर्णिकायां परलोकप्रस्थिताय भर्त्रे तिलाञ्जलिमदात्, सा एव मासाभ्यन्तरे वधूदुकूलं परिधाय रोमाञ्चिता देवराय विवाहमालां समर्पयति। विवेकहीनाः पशवोऽपि पूर्वसौहृर्द परित्यज्य एवं सहसा कामान्धा न भवन्ति। अहो अनार्यचरितम्। समागतः खलु राजकुलस्य विनिपातः। चन्द्रसेन सहस्व इदानीम् अन्तर्लीनं दुःखम्। रसने इदानीं मौनमेव ते शरणम्।

(ततः प्रविशन्ति हर्षनादमकरन्ददमनकाः।)

सर्वे – जयतु जयतु कुमारः।

चन्द्रसेनः – स्वागतं सर्वेषाम्। सखे हर्षनाद, कदा प्रत्यागतोऽसि गुरुकुलात्? वयस्य, अपि कुशलं तव?

हर्षनादः – प्रभुप्रसाद एव कुशलं परिजनस्य।

चन्द्रसेनः– न त्वं मम सेवकः, नापि अहं तव प्रभुः। किन्तु समानशीलौ सुहृदौ आवाम्। तत् कथय, किमर्थं दुर्गं समागतः?

हर्षनादः – दिवंगताय महाराजाय निवापाञ्जलिम् अर्पयितुम्।

चन्द्रसेनः – वयस्य अलं परिहासेन। नूनं मम मातुः विवाहोत्सवं द्रष्टुं समागतः।

हर्षनादः – न ज़ाने किमर्थम् इयं त्वरा विवाहस्य?

चन्द्रसेनः – सखे, एवम् अभिप्रायः। स्वल्पेन व्ययेन बहु साधनीयम्। येन पाकेन श्राद्धे पितरः संतर्पिताः, तेनैव विवाहे संबन्धिनोऽपि समाराधिताः। एकत्र श्राद्धपङ्क्तिः, अपरत्र विवाहपङ्क्तिः। इह पिण्डप्रदानम्, इह लाजहोमः। हन्त भोः वरं मरणम्, न पुनः ईदृशम् अभद्रदर्शनम्। तात, कथमेकाकिनं मां परित्यज्य परलोकं गतः। सखे, सततमहं तातम् अवलोकयामि।

हर्षनादः – कुमार, कथम्?

चन्द्रसेनः – वयस्य, मनसा।

हर्षनादः – परं मया एकवारं चक्षुषा साक्षात् दृष्टः स राजर्षिः। मूर्तिमान् राजधर्मः।

चन्द्रसेनः – सत्यम् अद्वितीयः स राजर्षिः। न पूर्वं भूतः, न पश्चाद् भविष्यति। अशक्यं पुनः तस्य दर्शनम्।

हर्षनादः – कुमार गतायां रात्रौ स मम दृष्टिपथम् अवतीर्णः।

चन्द्रसेनः – कः ?

हर्षनादः – तव पिता, अस्माकं ज्येष्ठराजः, पुण्यश्लोको महेन्द्रवर्मा।

चन्द्रसेनः – किं वदसि मम तातो दृष्टः ?

हर्षनादः – सख स्थिरमतिर्भव। आश्चर्यं ते कथयामि। मकरन्ददमनकौ अत्र साक्षिणौ।

चन्द्रसेनः – अरे त्वरितं कथय। मा विलम्बं कुरु।

हर्षनादः – इमौ यामिकौ दुर्गस्य पश्चिमद्वारे रक्षार्थं नियुक्तौ। ताभ्यां मध्यरात्र कश्चन पिशाचः दृष्टः। स दुर्गाङ्गणे इतस्ततः पर्यटन् आसीत्। ज्येष्ठराजेन सदृशी तस्य आकृतिः। आपादमस्तकं वीरवेषः। विविधैः शस्त्रैः अलंकृतः। स महानुभावः यामिकयोः पुरतः धीरं धीरं जगाम। तं दृष्ट्वा उभौ अपि भयेन कम्पितौ। आश्चर्येण विस्फारिता तयोः दृष्टिः। चित्रलिखिता इव स्तब्धा देहयष्टिः। भयविलुप्ता वाणी। अयं वृत्तान्तः ताभ्यां मह्यं निवेदितः। तं श्रुत्वा गतरात्रौ अहमपि तत्र गतः। अर्धरात्रे स पिशाचः यथावर्णितम् आविरभूत्। वामदक्षिणयोः हस्तयोः यावत् साम्यं, ततोऽपि अधिकतरं साम्यं पिशाच-महाराजयोः। किं बहुना यथा प्रतिबिम्बं बिम्बम् अनुकरोति, तथैव स पिशाचः महाराजम् अनुकरोति।

चन्द्रसेनः – कुत्र आविर्भूतः स पिशाचः ?

मकरन्दः – पश्चिमद्वारस्य पुरतः।

चन्द्रसेनः – किं न शब्दापितस्त्वया ?

हर्षनादः – मया द्विवारं पृष्टः। परं न किमपि प्रत्यब्रवीत् सः। स किल उन्मुखो भूत्वा किंचिद् वक्तुमैच्छत्। परं यावत् वक्तुं प्रक्रमते, तावत् कुक्कुटरुतम् अभूत्। तस्मिन्नेव क्षणे संकुचितशरीरः स तिरोधानं गतः।

चन्द्रसेनः – महदाश्चर्यम्। कथमेतत् संभाव्यते ?

हर्षनादः – कुमार, नात्र अक्षरमपि असत्यम्। यद् दृष्टं तत् तथैव निवेदयामि।

चन्द्रसेनः – साधु। आकुलीभूतोऽस्मि अनेन वृत्तान्तेन। अद्य रात्रौ कः

रक्षाकार्ये नियुक्तः ?

दमनकः – कुमार वयमेव।

चन्द्रसेनः – अपि शस्त्रधारी स पिशाचः ?

सर्वे – आपादमस्तकं शस्त्रधारी।

चन्द्रसेनः – अपि दृष्टं तस्य मुखम् ?

हर्षनादः – दृष्टं, यदा तेन अपाकृतम् अवगुण्ठनम्।

चन्द्रसेनः – अपि कुपिता तस्य मुद्रा ?

हर्षनादः – न तथा कुपिता, यथा दुःखिता।

चन्द्रसेनः – अपि विवर्णं तस्य मुखम् ?

हर्षनादः – अतीव विवर्णम्।

चन्द्रसेनः – अपि एकाग्रदृष्ट्या युष्मान् अपश्यत् ?

हर्षनादः – अत्यन्तम् अनिमेषया दृशा।

चन्द्रसेनः – कियच्चिरं तत्र स्थितः ?

हर्षनादः – यावत् कश्चन शतम् अङ्कान् गणयेत्।

चन्द्रसेनः – तद् अद्य रात्रौ स्वयमेव आगच्छामि। पुनरपि कदाचिद् आविर्भवेत्।

हर्षनादः – नास्ति मे शङ्का। अवश्यम् आविर्भवेत्।

चन्द्रसेनः – यदि नाम स पिशाचः तातमनुकरोति, अहं तम् अवश्यम् आवाहयामि। न कोऽपि मां निवारयेत्। सखायः, अस्ति मे एका अभ्यर्थना। अयं वृत्तान्तः अस्मासु एव तिष्ठतु। यद् भूतम्, यच्च भविष्यति, तत् सर्वं यत्नतः गोपनीयम्। तत् अद्य निशीथात् पूर्वमेव पश्चिमद्वारस्य पुरतः आगच्छामि। प्रतिपालयत मां तत्र।

सर्वे – यथाह कुमारः। (निष्क्रान्ताः।)

चन्द्रसेनः – (स्वगतम्) अहो शस्त्रपाणिः तातपिशाचः। किमपि अत्याहितम्। न हि अपचाराद् ऋते संभवति पिशाचसंचारः। त्वरते मे मनः पिशाचं द्रष्टुम्। चिरयति रात्रिः। हृदय मा उत्ताम्य, धीरं तावद् भव। सप्तपातालेष निखातम् अपि पापं भूमिमुद्भिद्य स्वयमेव आविर्भवति।

तृतीयः प्रवेशः ।

(शालेयमन्दिरम् । ततः प्रविशतः ललाटः मल्लिका च ।)

ललाटः – मल्लिके, सर्वं मम वस्तुजातं नौकायां निहितम् । पवनोऽपि अनुकूलः । तदापृच्छे त्वाम् । परं मां मा विस्मर । प्रतिमासं लेखं मे प्रेषय ।

मल्लिका – अयि कठोर, इदमपि निवेदनीयं नाम ?

ललाटः – मल्लिके अधुना त्वम् अनुशासनीयासि । एषु दिवसेषु कुमारश्चन्द्रसेनः त्वयि अनुरक्त इव दृश्यते । मधुलोलुपो भ्रमरः चूतमञ्जरीमिव सततं त्वाम् अनुगच्छति । परं तस्य मञ्जुगुञ्जनं न विश्वसनीयम् । अयं हि नवयौवनमदः । वसन्तसमये पुंस्कोकिलाः पञ्चमेन कूजन्ति । जलधरसमये नृत्यन्तो मयूराः षड्जन केकां विकुर्वते, अतीते तस्मिन् ते एव सहसा विरसा भवन्ति । पारिजातस्य मनोहरोऽपि परिमलः क्षणभङ्गुरः ।

मल्लिका – अपेहि, कुमारमपि भ्रमरचञ्चलं मन्यसे ?

ललाटः – भद्रे प्रथिता हि राज्ञां मधुपवृत्तिः । अथवा कामं त्वं तस्य प्राणेभ्योऽपि प्रिया । परं राजपुरुषाः स्वेच्छया परिणेतुं न स्वतन्त्राः । बहूनि तेषां बन्धनानि । राजहितम् अनुरुध्यैव तेषां विवाहाः संपद्यन्ते । तत् माऽस्तु मृगतृष्णिकायां प्रणयः । इदम् अज्ञात्वा मुग्धाः कन्यकाः मधुरैः प्रियशतैर् विलोभिताः विनयमपि आत्मनो न रक्षन्ति । तेन कमलकलिकाः विकसनात् प्रागेव कीटेन खण्डिताः भवन्ति । तत् अवहिता भूत्वा आत्मानमविनयाद् रक्ष । मा कामस्य वशं गमः ।

मल्लिका – बृहस्पते गृहीतः उपदेशः । परं त्वमपि सावधानो भव । अन्यथा परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम् ।

ललाटः – अलं शङ्कया । सर्वथा अभूमिः गुरुकुलवासः कामविकारस्य । ननु चिरायितं मया । पश्य, तातोऽपि इत एवागच्छति ।

(ततः प्रविशति शालेयः ।)

शालेयः – ललाट किमद्यापि अत्रैव तिष्ठसि ? त्वरस्व । अनुकूलः पवनः, संनद्धा नौका । सर्वे त्वां प्रतीक्षन्ते । तत् किं चिरायसे ?

ललाटः – तात प्रणमामि। (ललाटः पितुः पादयोः पतति, शालेयः तमुत्थापयति।) आयुष्मान् भव सौम्य, इष्टेन युज्यस्व। अधुना मम उपदेशं हृदि निबद्धं कुरु। मन्त्रं सततं निगूहस्व। मा प्रकाशय रहस्यम् अन्यस्य। शुभाशुभम् अविचार्य कार्यं मा प्रारभस्व। कुलशीलं परीक्ष्य संगतिं कुरु। एवं संगतं मित्रं भ्रातृनिर्विशेषं कुरु। यावच्छक्यं कलहं परिवर्जय। परं सकृत् प्रस्तुतः कलहः शत्रुमपराभूय न त्याज्यः। सर्वस्य वचनं शृणु। वचस्तत्रैव वक्तव्यम्, यत्रोक्तं सफलं भवेत्। नापृष्टः स्वाभिप्रायं प्रकाशयेत्। आयं विचिन्त्य व्ययं कुरु। शिष्टाचारमनुसृत्य महार्हाणि अपि सौम्यानि वस्त्राणि परिधत्स्व। वस्त्रं कुलप्रतिष्ठां शीलं च दर्शयति। ऋणं न कार्यम्, न वा देयम्। ऋणमाददानः अविचार्य व्ययं करोति। मित्रस्य दत्तम् ऋणं सौहृदं विनाश्य स्वयमपि अनुविनश्यति। यत् कर्म अन्तरात्मनः परितोषाय भवति, तत् कुरु। यत् परमुद्वेजयति तद् यत्नतः परिहर। आचार्यस्य नित्यं प्रियं कुरु। सत्येन वर्त्मना गच्छ सर्वं सत्ये प्रतिष्ठितम्। एष आदेशः। एष उपदेशः।

ललाटः – तात, गृहीतः उपदेशः। परिहीयते गमनवेला। तदनुजानीहि मां गमनाय।

शालेयः – गच्छ। सर्वे त्वां प्रतीक्षन्ते। शुभाः सन्तु ते पन्थानः।

ललाटः – मल्लिके गच्छामि। मा उपेक्षस्व मम वचनम्।

मल्लिका – सर्वं हृदि निबद्धम्।

ललाटः – साधयामि। (निष्क्रान्तः।)

शालेयः – मल्लिके किं तेन उपदिष्टम्?

मल्लिका – संशयात्मा ललाटः। मामुपदिशति कुमारम् अधिकृत्य 'अप्रमत्ता भव'।

शालेयः – दिष्ट्या स्मारितोऽस्मि। एषु दिवसेषु कुमारः वारं वारं तव मन्दिरम् आगच्छति। त्वमपि आत्मानं विस्मृत्य तत्कथायां रमसे। अपि सत्योऽयं प्रवादः? यदि सत्यः, सर्वथा अनुचितः। न शोभतेऽयं स्वैराचारः अमात्यकन्यायाः। किमर्थमयं दृढस्नेहः? कथय सर्वम्।

मल्लिका – स खलु माम् अनुरक्तः। अचिरादेव परिणेष्यति।

शालेयः – (सोपहासम्) अनुरक्तः परिणेष्यति। मुग्धे अलं विश्वस्य। विवाहो नाम बहुशः परीक्ष्य कर्तव्यः। सर्वथा अनभिज्ञासि ईदृशस्य लोकव्यवहारस्य।

मल्लिका – तात न जाने किमपराद्धं मया।

शालेय : – अहं कथयामि। बाले एवंविधैः वाङ्मधुभिः प्रतार्यते प्रकृतिसरलः कन्याजनः। अतोऽहं वच्मि अधुनैव सावधाना भव। नो चेत्, अहं माननीयेषु उपहास्यो भविष्यामि।

मल्लिका – तात अलम् अन्यथा संभाव्य। अकृतकः कुमारस्य अनुरागः। देवालये दुर्गां साक्षीकृत्य तेन शपथः कृतः।

शालेयः – मूढे स केवलम् उपचारः। जालमिदं प्रसृतं मृगनयनां निग्रहीतुम्। किं न जानासि अविनयबहुलम् इदं नवयौवनम् ? मदनज्वरेण पीडिताः युवानः समयपूर्वकं प्रतारयन्ति मुग्धं कन्यकाजनम्। अर्थशून्या हि तेषां प्रणयकथा। खद्योत इव तेषां प्रणयज्योतिः उत्पत्तिक्षणे एव विनश्यति। मा विश्वसिहि तस्य कितवस्य चाटुसहस्राणि। इमे राजपुत्राः नाम भ्रमराः, पूर्वसंगं विस्मृत्य नित्यं नवं प्रार्थयन्ते। अतः स्पष्टं कथयामि। इतःप्रभृति न केवलं तेन संभाषणं, परं तस्य दर्शनमपि परिहरणीयम्। यदि तेन मदनलेखः प्रेषितः सोऽपि निराकर्तव्यः। नैतद् विस्मर्तव्यम्।

चतुर्थः प्रवेशः

(दुर्गस्य पश्चिमद्वारम्, ततः प्रविशन्ति चन्द्रसेनः, हर्षनादः मकरन्दश्च।)

चन्द्रसेनः – अहो दुस्सहं शीतम्। अनेन हिमवातेन कम्पते मे शरीरम्।

हर्षनादः– हिमपवनः दशति मे अङ्गानि।

मकरन्दः – अहं तु दन्तवीणामेव वादयामि।

चन्द्रसेनः – हर्षनाद, कः समयः ?

हर्षनादः – शृणु, अधुनैव प्रहरघण्टा निनदति। अयमेव समयः पिशाचसंचारस्य।

(नेपथ्ये वाद्यनिर्घोषः।)

हर्षनादः – कुमार, किमेतत् ?

चन्द्रसेनः – अयं हि मदिरोत्सवः। अद्य नूतनो महाराजः मदिरां पीत्वा राज्याभिषेकं संमानयति।

हर्षनादः – किं तस्यैव अयं तूर्यनिर्घोषः ?

चन्द्रसेनः – तथैव। इयं हि विवेकभ्रष्टानां खादतमोदता, पिवतमाद्यता। मम पितृव्येण तु न कोऽपि स्पर्धते मधुपाने।

हर्षनादः – किमयं परंपरागत आचारः ?

चन्द्रसेनः – अयम् आचारः धर्मशास्त्रेण अनुमतः। परं न शिष्टपरिगृहीतः। अतः अद्यत्वे न कोऽपि तं परिपालयति। सर्वे वैदेशिकाः अस्माकं स्वैरं मधुपानं गर्हयन्ति। वयस्य पूर्वजैः बाहुबलेन समुपार्जितं धवलं यशः एते मद्यपाः सुराधारया मलिनयन्ति। किं बहुना एकोऽपि अयं दोषः गुणसहस्रं नाशयति।

(पिशाचः प्रविशति।)

हर्षनादः – कुमार, पश्य पश्य, आगतः स पिशाचः।

चन्द्रसेनः – भो भो यक्षगन्धर्वकिन्नराः परित्रायध्वं परित्रायध्वम्। रे रात्रिंचर ब्रूहि कस्त्वम् ? किं त्वं देवगतिं प्राप्तः पुण्यात्मा, उत निरयं गतः दुरात्मा ? किम् इमं दुर्गदेशम् आशिषा जीवयितुमागतः, उत शापेन भस्मीकर्तुम् ? पितृलोकं विहाय किमर्थम् इह समागतः ? त्वं हि दुर्गदेशस्य ज्येष्ठराजम् अनुकरोषि। मम तात इव आलक्ष्यसे। तात, महाराज, महेन्द्रवर्मन् किं ते मनसि वर्तते ? ब्रूहि। मणिकर्णिकायां मन्त्राग्निभिः भस्मीकृतं तव कलेवरं कथं पुनः सजीवं संजातम् ? किमर्थं शस्त्रपाणिः घोरायां तमिस्रायां संचरसि ? किमर्थम् अस्मान् भीषयसि ? अनवाप्तकामाः अपमृत्युं गताः वा पिशाचयोनिं प्रविशन्ति इति अनुशुश्रुम। तद् ब्रूहि। कस्त्वम् ? त्वामुद्धर्तुं किं मया विधेयम् ? यदिच्छसि तद् विधास्यामि।

(पिशाचः चन्द्रसेनस्य संज्ञां करोति।)

हर्षनादः – पश्य, एष त्वां संज्ञपयति। मन्ये त्वां किंचिद् रहस्यं निवेदयितुमिच्छति।

मकरन्दः – रहसि आगच्छ इति अनुनयते। परं मा एनम् अनुगच्छ।

हर्षनादः – मा एनम् अनुगच्छ।

चन्द्रसेनः – न सर्वसमक्षं किंचित् कथयिष्यति। अतः एनम् अनुगच्छामि।

हर्षनादः –कुमार, पिशाचोऽयम्। मा गच्छ।

चन्द्रसेनः – कुतो न ? नास्ति मे भयम्। न मे आस्था विनश्वरस्य देहस्य।

आत्मा तु अविनाशी। तं हन्तुं न कोऽपि प्रभवति। मुञ्च माम्। पश्य, पुनः पुनः प्रार्थयते। तद् गच्छामि।

हर्षनादः – कुमार, मा एवं साहसं कुरु। कुटिलः स त्वां गङ्गाजले पातयेत्, अथवा सुमेरुशिखरात् त्वां गर्ते निक्षिपेत्। अथवा घोररूपेण त्वां भीषयित्वा तव बुद्धिभेदं जनयेत्। (पिशाचः पुनः संज्ञपयति।) अतः निवारयामि त्वाम् अस्माद् अनर्थात्। (हस्ताभ्यां गृह्णाति।)

चन्द्रसेनः – वयस्यौ, मुञ्चतं माम्। न पिशाचः किन्तु दैवमेव माम् आह्वयति, तदेव मयि सामर्थ्यं निदधाति। अपसरतं मम मार्गात्। नो चेत् खड्गेन यमसदनं प्रेषयामि। किं न जानासि संकल्पिताद् अर्थात् न कदापि विरमन्ति धीराः ? तत् मुञ्चतं माम्। प्राणा मे व्याकुलाः पिशाचम् अनुगन्तुम्। महासत्त्व, प्रतिष्ठस्व, अहमपि अनुपदम् आगत एव।

(पिशाचः निष्क्रान्तः, चन्द्रसेनस्तम् अनुगच्छति।)

हर्षनादः – कथं गत एव ? भूताविष्ट इव धावति। न जाने किमापतिष्यति। दुर्गे भद्रं वितर दुर्गदेशस्य।

मकरन्दः – नैतदुचितं कुमारमेकाकिनम् उत्स्रष्टुम्। तदेहि, आवामपि अनुगच्छावः।

पञ्चमः प्रवेशः।

(पश्चिमद्वारस्य तटः। ततः प्रविशतः पिशाचचन्द्रसेनौ।)

चन्द्रसेनः – पिशाच, क नु खलु मां नयसि ? इतःपरं न शक्नोमि गन्तुम्। ब्रूहि।

पिशाचः – श्रूयताम्।

चन्द्रसेनः – अवहितोऽस्मि।

पिशाचः – समयोऽयं ज्वलितार्चिषं चितानलं प्रवेष्टुम।

चन्द्रसेनः – हा पिशाचहतक, ईदृशं ते भागधेयम्।

पिशाचः – अलम् अनया करुणया। शृणु एकाग्रेण मनसा। किंचिद् भीषणं

रहस्यं ते निवेदयामि।

चन्द्रसेनः – कथय। शृणोमि।

पिशाचः – न केवलं श्रोतव्यम्। परं श्रुत्वा प्रतिविधेयम्।

चन्द्रसेनः – त्वरस्व। श्रोतुं समुत्सुकोऽस्मि।

पिशाचः – वत्स अहं तव पिता महेन्द्रवर्मा, संप्रति पिशाचयोनिं प्रविष्टः। नक्तम् अवनिसंचारः, दिवा नरकनिवासः। न भोजनं नापि पानम्। केवलं तप्ततैले सर्वावयवपाकम् अनुभूय नरकयातनाः सोढव्याः। दुरितक्षयं यावद् इदमेव मे दग्धजीवनम्। परं प्रतिपिद्धोऽस्मि मर्त्यस्य नरकयातनां वर्णयितुम्। अथवा तदेव वरम्। अन्यथा स्वल्पमपि नरकवृत्तं श्रुत्वा तव प्राणाः कण्ठगता भवेयुः, सकलेन्द्रियाणि उच्छोषं गच्छेयुः, गात्राणि अवसीदेयुः, मुखं परिशुष्येत्, हृदयं भिद्येत, उल्का इव नभोमण्डलात्, नयनतारकं निस्सरेत् नेत्रगोलकात्। परं नैतत् प्रकाशनीयम् इति कठोरं कृतान्तशासनम्। चन्द्रसेन, शपथेन कथय अपि ते निश्चला भक्तिः पितरि?

चन्द्रसेनः – हा दैव! किम् इदमपि प्रष्टव्यम्?

पिशाचः – तेन हि प्रतीकारं कुरु पितृवधस्य।

चन्द्रसेनः – किं मेपितुर्वधः?

पिशाचः – वध एव। सर्वथा अनार्यः, अधर्म्यः, अभद्रः कूटवधः।

चन्द्रसेनः – त्वरितं निवेदय, कस्येदं दुश्चरितम्? वायुवेगेन आसाद्य क्षणादेव तं नरपशुं व्यापादयामि।

पिशाचः – वत्स दिष्ट्या शोभसे मे औरसः पुत्रः। शृणु। लताकुञ्जे प्रसुप्तं मां कृष्णसर्पः कदाचित् अदशत्, तेन अहं मृतः, इति वितथः प्रवादः निखिले दुर्गदेशे तव पितृव्येण प्रसारितः। परं यः माम् अदशत्, स एव कृष्णसर्पः अधुना सिंहासनम् अध्यास्ते।

चन्द्रसेनः – (स्वगतम्) अत एव मया शङ्कितम्, न हि अपचाराद् ऋते संभवति पिशाचसंचारः। (प्रकाशम्) किं मे पितृव्यः?

पिशाचः – स एव भ्रातृतल्पगामी पापिष्ठः पुरुषः। स एव कामान्धो नरपशुः, अनृतमयैः मधुरवचनैः विलोभ्य पतिव्रतां मे प्राणेश्वरीं भ्रष्टशीलाम् अकरोत्। विवाहहोमे हुताशनं साक्षीकृत्य 'धर्मे च अर्थे च कामे च नातिचरामि

नातिचरामि ' इति स्वीकृतं साप्तपदीनं सख्यं न मया स्वप्नेऽपि परित्यक्तम्। परं मां मासाभ्यन्तरे विस्मृत्य सर्वथा विसदृशं गुणहीनं मम अनुजं कामतृप्तय सा परिणीतवती। हन्त कोऽयं विनिपातः ! सतीम् अनसूयां दूषयितुं ब्रह्मविष्णु-महेशा अपि अक्षमाः, तारा पुनः राजाधिराजं सुग्रीवं पतिमवाप्यापि वालिनम् अनुगता। (कुक्कुटरुतं श्रुत्वा) अहो ब्राह्मोऽयं मुहूर्तः, समागता गमनवेला। तदलम् अतिविस्तरेण। संक्षेपतः कथयामि। एकदा अपराह्णे भोजनाद् अनन्तरं लताकुञ्जे गाढम् अस्वाप्सम्। तदा अवसरं प्राप्य तव पितृव्यः कालकूटं गृहीत्वा निभृतं माम् उपगतः। प्रसुप्तस्य मम कर्णं विषधारया अपूरयत्। क्षणेनैव तद् विषं धमनीः प्रविश्य रुधिरं प्रदूषयत्, सकलानि गात्राणि व्याप्नोत्। दध्ना तप्तं पय इव मम रुधिरं विषेण सहसा घनीभूतम्। निरुद्धशोणितस्य मम निखिलं शरीरं काष्ठमिव अचलम् अभूत्। एवं सुख-प्रसुप्तस्य मम स क्रूरकर्मा राज्यं, जायां, प्राणानपि क्षणाद् अपाहरत्। मरणसमय दुरितक्षयार्थं न मया प्रायश्चित्तम् आचरितं न वा गङ्गोदकं पीतम्। चन्द्रसेन, यदि ते मयि निश्चला भक्तिः, मम घातकमेनं शतशः खण्डयित्वा तद्रुधिरेण मां संतर्पय। दुर्गदेशस्य सिंहासनं भ्रातृघातकस्य व्यभिचारिणः पदस्पर्शेन कलङ्कितं मा भूत्। परं पितृवधेन विप्रकृतोऽपि मातुः प्रतिकूलं मा चर। दैवाधीनां तां कुरु। स्वकृतानि दुष्कृतानि एव तस्या हृदयं शतशः विदीर्णं करिष्यन्ति। हन्त ! शुक्रः अस्तं गच्छति। तदापृच्छे त्वाम्। स्वस्ति तेऽस्तु। स्वस्ति। स्वस्ति। (निष्क्रान्तः।)

चन्द्रसेनः – भो भोः दिव्याः भौमाः नागलोकीयाश्च देवताः यूयमत्र साक्षीभूताः। कोऽयमनर्थः ? हृदय, स्थिरं भव। मनः प्रकृतिम् आपद्यस्व। इन्द्रियाणि मा अवसीदत। हे पिशाच, पीडितात्मन्, मां वदसि ' स्मर्तव्योऽयं जनः '। यावत् मम शरीरे प्राणाः, यावन्मम अभ्रान्ता बुद्धिः, तावत् त्वां न विस्मरामि। अद्य-प्रभृति अस्तमिता मे रुचिः अध्ययने, विलुप्तो मृगयारसः, विरसं राजकार्यम्। विगतान्यव्यापारः तव संदेशमेव हृदयसंपुटे धारयामि। धिगिमां कुलकलङ्किनीं डाकिनीम्, रे कपटपटो। मधुमधुरं ते वचनम्, हृदयं पुनः गरलनिधानम्। मायाविन्, हसन् अपि खलो हन्ति, इति इदमेव ते अन्तरङ्गम्। तात हृदये निबद्धा तव वैखरी– ' रुधिरेण मां संतर्पय। '

(ततः प्रविशति हर्षनादः।)

हर्षनादः – जयतु जयतु कुमारः ।
मकरन्दः – दिष्ट्या वर्धते कुमारः ।
उभौ – कुमार, किं वृत्तम् ? किं पिशाचेन संदिष्टम् ?
चन्द्रसेनः – नाहं कथयामि । षट्कर्णो भिद्यते मन्त्रः ।
हर्षनादः – कुमार, शपथेन वदामि, न कस्यापि प्रकाशयामि ।
मकरन्दः – नाहं कथयिष्यामि ।
चन्द्रसेनः – नास्ति पितृव्यसमः महापातकी दुर्गदेशे ।
हर्षनादः – सर्वविदितमेतत् । किमत्र पिशाचावतारेण ?
चन्द्रसेनः – सत्यम् । अतःपरं मौनमेव वरम् । सर्वः ईप्सितसिद्धये प्रवर्तते । तद् गच्छतम् । अहमपि गच्छामि ।
हर्षनादः – वयस्य, दुरूहं ते वचः । न शक्नोमि अवगन्तुम् ।
चन्द्रसेनः – वयस्यौ, क्षन्तव्योऽयं जनः । शोकोपहतः एवं ब्रवीमि, न पुनर् युवाम् अधिक्षेप्तुम् ।
हर्षनादः – कुमार, केवलं कुतूहलवशात् मया पृष्टम्, न तव शोकं नवीकर्तुम् ।
चन्द्रसेनः – वयस्यौ, यथार्थभाषी स पिशाचः । अकृतकः तस्य संतापः । इतःपरं न शक्नोमि वक्तुम् । वयस्यौ, अस्ति काचिन् मे अभ्यर्थना ।
हर्षनादः – कथयतु कुमारः ।
चन्द्रसेनः – यद् अद्य दृष्टम्, श्रुतं वा, न तत् कस्यापि कदापि प्रकाशनीयम् ।
उभौ – कुमार, नावां प्रकाशयावः ।
(नेपथ्ये **पिशाचः** – खड्गं स्पृष्ट्वा शपथः क्रियताम् ।)
चन्द्रसेनः – अद्यापि न तिरोहितः पिशाचः । हर्षनाद, मकरन्द, शपथः क्रियताम् ।
उभौ – सशपथं वदावः यदद्य दृष्टं श्रुतं वा तत् न कस्यापि प्रकाशयावः ।
(नेपथ्ये **पिशाचः** – खड्गं स्पृष्ट्वा भूयोऽपि शपथः क्रियताम् ।)
चन्द्रसेनः – खड्गं स्पृष्टवा भूयोऽपि शपथः क्रियताम् । सर्वं विदितं पिशाचस्य । तदन्यत्र गच्छावः ।
(नेपथ्ये **पिशाचः** – खड्गं स्पृष्ट्वा भूयोऽपि शपथः क्रियताम् ।)
उभौ – खड्गं स्पृष्ट्वा सशपथं वदावः, यदद्य दृष्टं, तत् न कस्यापि प्रकाशयावः ।

हर्षनादः –महदाश्चर्यम् । प्रतिषिद्धः रहस्यभेदः पिशाचेन ।

चन्द्रसेनः – आश्चर्यम् । आश्चर्यम् । अथवा किमत्र चित्रम् ? शास्त्रेण अनालोचितानि अद्भुतानि दिवि वा भुवि वा सततम् उत्पद्यन्ते । वयस्यौ, इदमपि अन्यत् कथनीयम् । अतःपरम् उन्मत्तप्रलापी युवराजः इति लोकस्य दर्शयामि । तेन अक्षमः चन्द्रसेनः कार्याकार्यविचारस्य इति प्रवादः सर्वत्र प्रसरेत् । परं कृतकः मम उन्मादः इति संदिग्धाक्षरैः, गूढभाषणैः, इङ्गितैर्वा न कस्यापि दर्शनीयम् ।

(नेपथ्ये **पिशाचः** – शपथः क्रियताम् ; शपथः क्रियताम् ।)

चन्द्रसेनः – त्रस्तपिशाच, समाश्वसिहि समाश्वसिहि ।

उभौ – इदम् उन्मादरहस्यं न कस्यापि प्रकाशयावः ।

चन्द्रसेनः – वयस्यौ, वहु उपकृतं युवाभ्याम् । साधयामस्तावत् । परं वाचं संयम्य रहस्यं रक्षणीयम् । करालः कालः । विमुखं भागधेयम् । कलिचक्रं परिवर्त्य धर्मचक्रं प्रवर्तनीयम्, इति मम ललाटलिखितम् । अथवा अयं राजधर्म एव । राजा कालस्य कारणम् ।

इति प्रथमोऽङ्कः ।

द्वितीयोऽङ्कः ।

प्रथमः प्रवेशः

(शालेयमन्दिरम् । ततः प्रविशतः शालेयः वर्धनकश्च ।)

शालेयः – वर्धनक, इदं धनम्, इमं लेखं च ललाटस्य उपहर ।

वर्धनकः – यदाज्ञापयति अमात्यः ।

शालेयः – वर्धनक, गुरुकुले कथं स व्यवहरति, कीदृशं तस्य शीलम्, इति स्नातकेभ्यः विदित्वा अनन्तरम् एव ललाटं पश्य ।

वर्धनकः – तथा करिष्ये ।

शालेयः – प्रथमं तावत् काम्पिल्यात् कियद्दूरे महर्षेः कौण्डिन्यस्य आश्रमः वर्तते, तत् जानीहि । अनन्तरं सन्ति वा तत्र दुर्गदेशीया अन्तेवासिनः, अपि ते सम्यग् अधीयते, इति प्रष्टव्यम् । कथाप्रसङ्गेन इदमपि वक्तव्यं यत् अमात्यपुत्रः ललाटः तत्र अध्ययनार्थम् आगतः । तस्य पितरम् अहं जानामि, ललाटोऽपि किंचित् परिचितः मम ।

वर्धनकः – स्वामिन्, गृहीतोऽर्थः ।

शालेयः – अनन्तरं कथय, 'एवं किंवदन्ती मया श्रुता । स किल व्यसनेषु सक्तः, द्यूतं क्रीडति, मदिरां पिबति, मृगयां चरति, विपणिं गत्वा आक्रोशति, किं बहुना गणिकागृहमपि गन्तुकामः' । यतः अनियन्त्रणं विहरन्तो युवानः मधुरैः विषयैः आकृष्यन्ते । सहजा हि प्रवृत्तिः यूनां व्यसनेषु । एवं सतीर्थ्यानां पुरतः देशकालानुसारेण कल्पितैः यौवनसुलभैः दोषैः दूषणीयो ललाटः । परं दोषमारोपितोऽपि ललाटः यथा अप्रतिष्ठां न भजेत्, तथा प्रयतस्व । अन्यथा जघन्यान् दोषान् आरोप्य मम पुत्रस्य अकीर्तिं करिष्यसि ।

वर्धनकः – स्वामिन् कथम् एवं संभाव्यते ?

शालेयः – एवं कृते, कश्चित् तस्य वयस्यः भूतार्थं निवेदयेत् । स चेत् सहचरैः विवदते, द्यूतं क्रीडति, मदिरां पिबति, गणिकागृहं गच्छति, तथा कथयेत् । अन्यथा 'शीलसंपन्नः ललाटः, न युज्यते एवंविधैः मिथ्यारोपैः दूषयितुम्'

इति वदेत्। एवम् अलीकवचनैः तथ्यम् अन्विष्यन्ति विचक्षणाः। तदेव मे बुद्धिकौशलं, यत् परोक्षमपि अर्थं पश्यामि चारचक्षुषा। तस्मात् मदुपदेशम् अनुसृत्य पुत्रस्य वृत्तान्तं विजानीहि। विज्ञाय च मामपि विदितवृत्तं कुरु।

वर्धनकः – यथाह अमात्यः। (निष्क्रमितुं प्रवर्तते।)

शालेयः – परं तिष्ठ। अनामयं पृष्ट्वा मद्वचनात् स ललाटो वक्तव्यः, 'राजनीतौ खड्गविद्यायां च अप्रतिहतो भव। अयं दुर्गायाः प्रसादः, इमे च मल्लिकया अर्पिता गुडापूपाः, एते स्वयमेव भक्षणीयाः, नान्यस्मै देयाः'। किम् अवगतोऽर्थ ?

वर्धनकः – अवगतः। स्वामिन्, यथादिष्टं करिष्यामि। माऽस्तु चिन्ता। (इति निष्क्रान्तः। ततः प्रविशति मल्लिका।)

मल्लिका – तात, तात।

शालेयः – वत्से, किमेवं कातरासि ? किं वृत्तम् ? कथय।

मल्लिका – तात, बलवत् संत्रस्तास्मि।

शालेयः – कुतोऽयं संत्रासः ? जाते, कथय सर्वम्।

मल्लिका – यावदहं मदीये मन्दिरे वीणावादने निमग्ना, तावत् कुमारः सहसा समुपस्थितः। विकीर्णास्तस्य केशाः, केयूरशून्यौ बाहू, अकुण्डलौ कर्णौ, वसनमपि परिधूसरम्, विवर्णं मुखम्, विकलानि अङ्गानि, शून्याः दृष्टिः, विषमा गतिः, यमयातनाभिः पच्यमान इव अलक्ष्यत।

शालेयः – किं मदनबाधया उन्मत्तः ?

मल्लिका – तात, कथमहं जाने ? परम् उद्दामस्तस्य विकारः।

शालेयः – किं कृतं कुमारेण ?

मल्लिका – प्रथमं मणिबन्धे गृहीत्वा मां दृढम् अपीडयत्। अनन्तरं कतिचित् पदानि अपसृत्य मम मुखम् अनिमेषम् अवालोकयत्। मां चित्रे लिखितुमिव ऐच्छत्। ततः मम वामबाहुम् ईषत् कम्पयित्वा, शिरः त्रिवारम् उपरि अधः विधूनयन् आपादमस्तकं मां निपुणं निरूपितवान्। अनन्तरं विगतसत्त्व इव दीर्घम् उष्णं च निःश्वस्य मम हस्तं सहसा अमुञ्चत्। ततः मुखम् अपरावृत्य तृषिताभ्यां लोचनाभ्यां मां पिबन्निव मम मन्दिरात् निरगच्छत्।

शालेयः – एहि। राजानमेव उपगच्छावः। नूनम् अतिभूमिं गतः अस्य मदनज्वरः। उपेक्षितश्चेत्, महान्तम् अनर्थं जनयिष्यति। अपि अधिक्षिप्तः स परुषवचनैः ?

मल्लिका – कथमिदं संभवति ? परं तव आदेशवशात् कुमारस्य प्रणयलेखा मया निराकृताः, किं बहुना तस्य दर्शनमपि परिहृतम्।

शालेयः – नूनम् इदमेव उन्मादकारणम्। विमृश्यकारिणाऽपि मया कथमिदं नालोचितम् ? मया शङ्कितं, स किल कृतकैः चाटुसहस्रैः त्वां प्रतारयितुमीहते। धिगिमं संशयपिशाचम्। अहो अविवेकेन यूनामिव, संशयेन वृद्धानामपि बुद्धिः कलुषिता भवति। अयं मदनवृत्तान्तः देवाय अवश्यं निवेदनीयः। यतः संवृतः प्रणयः परिणामे भयंकरो भवति। तदेहि, राजमन्दिरमेव गच्छावः। (उभौ निष्क्रान्तौ।)

द्वितीयः प्रवेशः

(राजमन्दिरम्। राजा, राज्ञी वञ्जुलमञ्जुलौ दासाश्च।)

राजा – वञ्जुल, मञ्जुल, स्वागतं युवयोः। प्रीतोऽस्मि युवयोः दर्शनेन। अद्य अनन्यसाध्यं किंचित् राजकार्यं निर्वर्तयितुं युवाम् आहूतौ। विदितमेव युवाभ्यां यत् एषु दिवसेषु अपूर्वः कोऽपि विपर्ययः चन्द्रसेनस्य चित्तवृत्तौ। आमूलाग्रं परिवर्तनं तस्य आचारविचारयोः। सुनिपुणं परीक्ष्यापि न ज्ञायते किंनिमित्तोऽयं विषादः ? कदाचित् पितृनिधनमपि अस्वास्थ्यस्य कारणं स्यात्। युवां हि चन्द्रसेनस्य आ शैशवात् सुहृदौ। गुरुकुलेऽपि सहैव स्थितं, सहैव अधीतं युवाभ्याम्। अतः चिरपरिचितौ युवामेव चन्द्रसेनस्य मनोविनोदनं कर्तुं प्रभवतः। तदद्यप्रभृति कंचित् कालम् अस्मिन्नेव राजमन्दिरे चन्द्रसेनेन सह स्थातव्यम्। कथाप्रसंगेन प्रसन्नचित्तः कुमारः कदाचित् निगूढां हृदयव्यथां युवयोः प्रकाशयेत्। यतः ज्ञात एव व्याधिः प्रतिकर्तुं शक्यते।

राज्ञी – भद्रौ, चन्द्रसेनः सततं युवां स्मरति। युवयोस्तस्य विश्वासः। अतः सौहृदं स्मृत्वा युवाभ्याम् अत्रैव स्थातव्यम्, इति प्रार्थये। प्रसन्नो महाराजः स्वविभवानुरूपं संमानयिष्यति युवाम्।

मञ्जुलः – देवि किं प्रार्थनया ? सर्वतोमुखी राज्ञः प्रभुता अस्मासु ।

वञ्जुलः – राजचरणयोः सेवालाभेन आत्मानं धन्यं मन्यावहे ।

राजा – संतुष्टाः स्मः । तत् त्वरितं चन्द्रसेनं द्रष्टुमर्हतः । द्वारपाल, इमौ चन्द्रसेनमन्दिरं प्रापय ।

मञ्जुलः – अङ्गीकृतं सफलं भवतु राजकृपया । तद् गच्छावः । (निष्क्रान्तौ वञ्जुलमञ्जुलौ ।)

(ततः प्रविशति शालेयः ।)

शालेयः – देव, अस्माकं राजदूतौ राजकार्यं साधयित्वा ताम्रदेशात् प्रतिनिवृत्तौ ।

राजा – प्रियंवदः खलु शालेयः ।

शालेयः – देवप्रसादस्यैव अयं महिमा । राजसंतोषेणैव कृतार्थोऽयं परिजनः । महाराज, कुमारस्य उन्मादकारणमपि मया परिलक्षितम् । आ बाल्यात् राजकार्यं निर्वाहयतो मे नास्ति कश्चिदविषयः । सूक्ष्मं व्यवहितमपि अर्थं ग्रहीतुं प्रभवति मे बुद्धिः ।

राजा – तत्कथय । समुत्सुकोऽस्मि श्रोतुम् ।

शालेयः – प्रथमं तावत् ताम्रदेशस्य वृत्तान्तं शृणोतु देवः । अनन्तरं कुमार-वृत्तान्तम् । मधुरेण समापयेत् ।

राजा – तेन हि संमाननपुरस्सरं तौ प्रेषय ।

अमात्यः – यदाज्ञापयति देवः । (निष्क्रान्तः शालेयः ।)

राजा – देवि, चन्द्रसेनस्य उन्मादकारणं किल शालेयेन परिज्ञातम् । प्रिये वसुमति, कस्ते तर्कः ?

राज्ञी – पितुः आकस्मिकं निधनम् आवयोश्च अकाले विवाह इत्येतदेव चन्द्रसेनस्य उन्मादकारणम् । नान्यत् किमपि पश्यामि ।

राजा – अथवा किं तर्केण ? अचिरेणैव ज्ञास्यामः ।

(ततः प्रविशति शालेयः राजदूताभ्यां सह ।)

राजा – स्वागतं कृतकार्ययोः राजदूतयोः । कच्चित् कुशली तत्रभवान् ताम्राधि-पतिः ? किं तेन संदिष्टम् ?

राजदूतः – स हि शुभाशंसनपुरस्सरं भवन्तमिदमाह, 'भवत्संदेशं पठित्वा भ्रातृव्यः परशुधरः मया निगृहीतः । परशुधरोऽपि समयपूर्वकम् इदं प्रति-

श्रुतवान्, न पुनः दुर्गराजेन विग्रहं करिष्यामि इति'। एतत्सर्वं संधिनिविष्टं कृत्वैव ताम्राधिपेन परशुधरः निगडबन्धनात् मोचितः। राजदेयाः सुवर्णमुद्राः अपि अचिरात् प्रेषयामि इति संदिष्टम्। अयं हि तेन प्रेषितो लेखः। पठित्वा देव एव प्रमाणम्। (इति राज्ञे लेखम् अर्पयति।)

राजा – महान् प्रमोदः। यथावसरं इमं लेखं पठित्वा प्रतिलेखं कल्पयामः। अभिनन्दनीया खलु युवयोः नीतिनिपुणता। तदिदानीं यात्राश्रमम् अपनीय रात्रौ भोजनार्थं राजमन्दिरम् आगच्छतम्। इमं ताम्रविजयं मदिरासाक्षिकं संमानयामः। (निष्क्रान्तौ राजदूतौ।)

शालेयः – देव, इदं सर्वं यथायोजनं संपन्नम्। कीदृशी राज्ञः सर्वतोमुखी प्रभुता, कुतो वा राज्ञो राजभावः, कुतो वा दिवसस्य दिवसत्वम्, कुतो वा रात्रेः रात्रित्वम्, कुतो वा कालस्य कालत्वम्, इत्यत्र पाण्डित्यपूर्णः ऊहापोहो नाम दिवसस्य, रात्रेः, कालस्य च अपव्यय एव। अतः विस्तरम् अकृत्वा कुमारवृत्तं संक्षेपेण निवेदयामि। मितं च सारं च वचो हि वाग्मिता। बहु भाषणम् अल्पसारं यः करोति, स केवलं वावदूकः। अतः सूत्ररूपेण यदि कथनीयम्, तर्हि कुमारश्चन्द्रसेनः उन्मत्तः। उन्मत्तमेव तम् अहं ब्रवीमि। उन्मत्तस्य लक्षणं नाम उन्मत्तस्य उन्मत्तभावः। कथमन्यथा उन्मत्तशब्दस्य प्रयोगः? आस्तां तावत्।

राज्ञी – अलमनेन आडम्बरेण। संक्षेपेण उच्यताम्।

शालेयः – देवि, आडम्बरं दूरतः परिहरामि। न मे रोचते शब्दगौरवम्। कुमारः उन्मत्तः इति इदं सत्यम्; यदिदं सत्यं तत् सर्वथा शोच्यम्, यदिदं शोच्यम्, तत् सर्वथा सत्यम्। यदि शब्दविस्तरं परित्यज्य वक्तव्यम्, तर्हि कुमारः उन्मत्तः इत्येषा वस्तुस्थितिः। एवम् अभ्युपगते कुमारस्य उन्मत्तभावे, किमस्य कारणम् इति प्रश्नः समुदेति। यद्यत् कार्यम् तत् सकारणम्। अतः अयम् उन्माददोषः विना कारणं न संभवति। न हि अकारणं कार्यम् उत्पद्यते। एवं स्थिते किम् अवशिष्यते? अयम् उन्माददोषः असाधारणकारणाद् उत्पन्नः। तात्पर्यं च किमस्य कारणम्? श्रूयताम्। अस्ति तावद् मम दुहिता। यावदियं मदाज्ञां पालयति, तावत् सा मदीया। तया खलु कन्याधर्मम् अनुसृत्य अयं लेखः मम समर्पितः। तमहं पठामि। श्रुत्वा देवः प्रमाणम्। "अयि सारङ्गलोचने

प्राणेश्वरे लावण्यचन्द्रिके मल्लिके –" प्राणेश्वरे इति अपाणिनीयं रूपम्। मल्लिका हि कलिका। तस्याः सारङ्गलोचनया उपमानोपमेयभावोऽपि न हृदयंगमः। आस्तां तावत्।

राज्ञी – किमिदं कुमारेण मल्लिकायै लिखितम्?

शालेयः – देवि, अलमनया उत्कण्ठया। सर्वमपि मदनलेखं यथाक्षरं पठामि। श्रूयताम्।

न स्नानं न च भोजनं न पठनं नान्यत्र सौख्यं धृतिः
नान्यस्त्रीजनदर्शनं न च कथानिद्राविलासोद्यमः।
किन्तु त्वां परिचिन्तयामि सततं ध्यानेन चेतःस्थिताम्
स्वप्नालोकनकामकेलिविधिना जीवाम्यहं मल्लिके॥

प्रिये मल्लिके, नास्ति मे नवनवोन्मेषशालिनी प्रतिभा, न वा भावाविष्करण-सामर्थ्यम्; परं त्वयि अहं हृदा मनीषा बद्धभावः। चातको मेघबिन्दूनिव तव दर्शनं प्रतीक्षमाणः, चन्द्रसेनः।

मल्लिकया इदं पत्रं मम दर्शितम्। किं बहुना, यत् तस्य काले काले प्रणयभाषितं, तदपि तया समग्रं निवेदितम्।

राजा – अपि अभिनन्दितः मल्लिकया चन्द्रसेनस्य प्रणयः?

शालेयः – परं प्रथमं तावदिदं वक्तव्यं, किमयं दासः विश्वासभाजनं देवस्य?

राजा – न केवलं विश्वासभाजनं, किन्तु निधानं सचिवगुणानाम्।

शालेयः – अचिरेणैव अन्वर्थं भवेत् राजवचनम्। मल्लिकया अकथितोऽपि कुमारस्य प्रणयवृत्तान्तः मया पूर्वमेव लक्षितः। तदानीमेव किमत्र विधेयम् इति मया चिन्तितम्। किमयं प्रणयः उपेक्षणीयः, उत अभिनन्दनीयः, उत बीजावस्थायामेव उन्मूलनीयः। साङ्गोपाङ्गं सर्वं समीक्ष्य, मया मल्लिका एवम् उपदिष्टा, 'क्षत्रियकुलसंभूतः खलु कुमारश्चन्द्रसेनः। स कथं ब्राह्मण-कन्यां परिणयेत्? अन्यच्च, राहुग्रस्तं तव सप्तमस्थानम्। शनिदृष्टश्चन्द्रोऽपि वक्रीभूतः, न तव ललाटलिखितं सम्राज्ञीपदम्। तन् नार्हसि राजपुत्रं कामयितुम्। अतः अद्यप्रभृति निराकर्तव्यः तेन प्रेषितो मदनलेखः, न स्वीकार्यः प्रणयोप-हारः, किं बहुना, तस्य दर्शनमपि परिहरणीयम्'। मल्लिकयाऽपि पितृभक्त्या यथादेशम् अनुष्ठितम्। एवं तया प्रत्याख्यातः चन्द्रसेनः प्रथमं निर्वेदं

प्राप्तः; अनन्तरं तस्य अन्नद्वेषः उद्भूतः, तदनु प्रजागरक्लृशः प्रतिदिनम् अङ्गैः परिहीयमाणः अन्ते इमां दशाम् अनुप्राप्तः।

राजा – देवि, किम् उपपद्यते अमात्यस्य तर्कः ?

राज्ञी – भवेत्।

शालेयः – जानात्येव देवः न मे तर्कः अन्यथा भवति।

राजा – यदि भवति ?

शालेयः – तर्हि इदमस्मात् वियोज्यताम् (शिरः स्कन्धं च प्रदर्शयति।) सति प्रसङ्गे पातालेऽपि निगूढं रहस्यं श्येन इव निपत्य गृह्णाति मे बुद्धिः।

राजा – अमात्य, प्रसन्नोऽपि भवतस्तर्कः प्रमाणम् अपेक्षते।

शालेयः – देव, एषु दिवसेषु शून्यहृदयः कुमारः सौधतले सुचिरं परिक्रामति।

राज्ञी – ततः किम् ?

शालेयः – तद् इदानीं मम दुहिता यथा तस्य दृष्टिपथम् अवतरेत् तथा करोमि। आवां च अन्तरितौ भूत्वा तयोः संवादम् आकर्णयावः। यदि च प्रणयादन्यत् कुमारस्य उन्मादकारणं भवेत्, अनुपदमेव अमात्यवस्त्रमवतार्य, काषायं परिधाय हिमवन्तं गमिष्यामि।

राजा – उदारः कल्पः।

राज्ञी – पश्य, अयं वराकः निर्विण्णः इत एव आगच्छति।

राजा – वसुमति, एहि। वयमपि अन्तर्हिता भूत्वा पश्यामः।

शालेयः – यावदहमपि चन्द्रसेनं प्रतीक्षमाणः अत्रैव तिष्ठामि।

(शालेयं विहाय सर्वे निष्क्रान्ताः। ततः प्रविशति चन्द्रसेनः भूर्जपत्रं पठन्।)

शालेयः – जयतु जयतु कुमारः। कच्चित् कुशली भवान् ?

चन्द्रसेनः – कथं नाम अकुशलं राजदयितस्य ?

शालेयः – किं प्रत्यभिजानाति मां कुमारः ?

चन्द्रसेनः – नूनं प्रत्यभिजानामि। मत्स्यग्राही धीवरो भवान्।

शालेयः – कुमार, नाहं धीवरः।

चन्द्रसेनः – तेन कुतो न भवान् धीवर इव सत्यव्रतः ?

शालेयः – किं सत्यव्रतः ?

चन्द्रसेनः – सुदुर्लभः खलु सत्यव्रतः अस्मिन् कलिकाले।

शालेयः – अवितथमाह कुमारः ।

चन्द्रसेनः – (आकाशं दृष्ट्वा) अग्निसंगतं घृतं द्रवति । सूर्यसमागमेन श्वकलेवरादपि कृमिकीटका जायन्ते । भद्र, अपि अस्ति ते दुहिता ?

शालेयः – अस्ति ।

चन्द्रसेनः – परिरक्ष तां सूर्यसंगमात् । क्षेत्रे पतितं बीजम् अङ्कुरायते । अतोऽहं ब्रवीमि, त्वं दुहितरि सावधानो भव ।

शालेयः (स्वगतम्) – किमस्य तात्पर्यम् ? अद्यापि मम दुहितरमेव अनुध्यायति । प्रथमं तावत् न मां प्रत्यभिजानाति, अनन्तरं वदति, मत्स्यग्राही धीवरो भवान् । नूनम् अतिभूमिं गतः अस्य मन्मथः । अथवा किमत्र चित्रम् ? अहमपि नवयौवने मन्मथशरेण विद्धः ईदृशीमेव अवस्थाम् अन्वभवम् । पुनरपि एनं पृच्छामि । किं कुरुते कुमारः ?

चन्द्रसेनः – शब्दपारायणम् ।

शालेयः – परं किमस्य तात्पर्यम् ?

चन्द्रसेनः – कस्य ?

शालेयः – कुमारेण पठ्यमानस्य ग्रन्थस्य ।

चन्द्रसेनः – परनिन्दा । अयं जाल्मो लिखति, ‘गलिते वयसि शिरः पलितं भवति । भालं वलिनं भवति । चक्षुः बिल्वफलमिव चिक्कणम् उद्भमति । मुखं लालाम् उद्गिरति । संधिबन्धा विकला भवन्ति । शरीरं रोगजर्जरं भवति । बुद्धिः भ्रान्ता भवति । यद्यपि इदं सार्वजनीनं सत्यम्, अथापि शिष्टा न वर्णयन्ति । आर्य, वयसा वर्धमानः सर्वोऽपि जन्तुः प्रतिदिवसं स्थविरतरो भवति । परमार्य, त्वं यदि कर्कट इव पुच्छगतिम् आश्रित्य विपर्ययेण कालं क्रमसे, नचिरेणैव तरुणतरो भविष्यसि ।

शालेयः (स्वगतम्) – अहो सुसंगतानि अस्य उन्मत्तप्रलपितानि । (प्रकाशम्) वातोपहतः कुमारः निर्वातं गन्तुमर्हति ।

चन्द्रसेनः – तत् किं मम निर्वाणम् अभिलषसि ?

शालेयः – (स्वगतम्) अर्थगर्भम् अस्य प्रतिवचनम् । अहो अपूर्वः कोऽपि वाग्विलासः अस्य उन्मत्तस्य । एतादृशं वाक्चातुर्यं प्रकटयितुं प्रतिभाशालिनः कवयोऽपि अक्षमाः । अस्तु, मल्लिकामेव अत्र प्रेषयामि । (प्रकाशम्) कुमार, अनुजानीहि मां गमनाय ।

चन्द्रसेनः – किं मे प्रियम् इतोऽन्यत् ? केवलं मम जीवितं विहाय यद्यदिच्छसि, तत् सर्वम् अधिगमिष्यसि ।

शालेयः – शान्तं पापम्। शान्तं पापम्। कुमार, दुर्गा ते भद्रं वितरतु। साधयामि। (इति निष्क्रामति।)

चन्द्रसेनः – अहो दुष्परिहरा इमे वृद्धवैधेयाः। (ततः प्रविशतः वञ्जुलमञ्जुलौ।)

शालेयः – किं कुमारं द्रष्टुमिच्छथः ? अयमसौ कुमारः ।

वञ्जुलमञ्जुलौ – जयतु जयतु कुमारः ।

चन्द्रसेनः – स्वागतं प्रियवयस्ययोः । कदा नु खलु युवाम् आगतौ ? अपि कुशलं युवयोः ? को विशेषः ?

वञ्जुलः – को विशेषः मादृशां पामराणाम् ?

मञ्जुलः – निरतिशयसुखाभावः एव अस्मान् सुखयति । लक्ष्मीः न अस्मान् शिरसि धारयति ।

चन्द्रसेनः – नाऽपि पादेन मृद्नाति ।

मञ्जुलः – सत्यम् । न मूर्ध्नि स्थितिः । नाऽपि चरणैरवताडनम् ।

चन्द्रसेनः – तेन हि लक्ष्म्याः मेखलाश्रितौ युवाम्,तस्या रहस्यवेदिनौ अन्तः-पुरदासौ । का वार्ता ?

मञ्जुलः – न काऽपि । सर्वतः समृद्धिः स्वधर्मनिरतानां प्रजानाम् ।

चन्द्रसेनः – तेन हि अचिरभावी प्रलयः। परं न भूतार्थं स्पृशति युवयोः वृत्तान्तः । विशेषेण पृच्छामि। वयस्यौ किमपराद्धं युवाभ्याम्, यदर्थं कारावासेन दण्डितौ ?

मञ्जुलः – कुमार, इदं राजमन्दिरम्, किमुच्यते कारागृहमिति ?।

चन्द्रसेनः – वयस्यौ, सर्वं दुर्गराज्यमेव कारागृहम् ।

मञ्जुलः – तेन हि निखिलं जगदिदं कारागृहं भवेत् ।

चन्द्रसेनः – सत्यमाह भवान् । जगदिदं नाम अतिविशालं कारागृहम्, यत्र बहवो वन्धनालयाः , नैकानि पातालगृहाणि, असंख्याश्च अन्धकूपाः । दुर्गराज्यं तु नरकसमं कारागृहम् ।

मञ्जुलः – नैतदावयोर्मतम् ।

चन्द्रसेनः – तेन हि नदं युवां प्रति कारागृहम्। न हि स्वभावादेव किंचित् प्रियम्, अप्रियं वा अस्ति। मन एव सर्वं तथा तथा विकल्पयति। मम पुनः दुर्गराज्यं कारागृहमेव प्रतिभाति।

मञ्जुलः – तव दूराधिरोहिणी आशा एव 'इदं कारागृहम्' इति मनुते। क्व विशालं ते मनः, क्व च अल्पविषयं दुर्गराज्यम्।

चन्द्रसेनः – कमलकोशे निबद्धोऽपि भ्रमरः अनन्तस्य ब्रह्माण्डस्य स्वामिनमात्मानं मन्यते। अहमपि तथैव चिन्तयेयम्, यदि नाम इमे दुःस्वप्नाः अन्तराया न भवेयुः। भवतु। वयस्यौ, सुहृद् भूत्वा पृच्छामि, किमर्थं युवां दुर्गदेशम् आगतौ?

वञ्जुलः – कुमारदर्शनेन आत्मानं पावयितुम्।

चन्द्रसेनः – महान् मे संतोषः सुहृत्समागमेन। परम् अकिंचनोऽहं युवयोरातिथ्यं कर्तुम्। परं विश्रब्धं कथयतम्, किं स्वयमेव युवाम् आगतौ, उत केनचिदाहूतौ? न हि प्रयोजनं विना कश्चिद् राजमन्दिरम् आगच्छति। तदुच्यताम्। स्नेहेन पृच्छामि। किमर्थं युवयोरागमनम्?

मञ्जुलः – कुमार, किमत्र वक्तव्यम्?

चन्द्रसेनः– यत्सत्यं, तदेव वक्तव्यम्। किं नैतत् सत्यं, युवामत्र आहूतौ महाराजेन? अलं गोपायित्वा। यद् वाचा निगूढं, तत् चक्षुः प्रकाशयति। न हि परातिसंधाने कुशलौ युवाम्। तद् ब्रूतं, महाराजेन आदिष्टौ मामुपगतौ।

वञ्जुलः – परं किमर्थम् आहूतौ?

चन्द्रसेनः – तद् युवाभ्यामेव निवेदनीयम्। (उभौ परस्परं संज्ञां कुरुतः।) वयस्यौ, युवां मम सब्रह्मचारिणौ, सर्वकालसुहृदौ, समानवयस्कौ, तत् न युक्तं मां प्रतारयितुम्। विश्रब्धं कथयतम्, 'आवाम् आहूतौ' इति।

मञ्जुलः – (जनान्तिकम्)–वञ्जुल, न शक्यते अतःपरं गोपायितुम्। निगूढमपि अर्थं गृह्णाति अस्य तीक्ष्णा बुद्धिः।

चन्द्रसेनः – वयस्यौ, अलं प्रयासेन। अकथितमपि ज्ञायते एव सर्वम्।

वञ्जुलः – सम्यग् अवधीरितं भवता, आवाम् आहूतौ।

चन्द्रसेनः – अधुना किमर्थमाहूतौ, तदपि अहमेव कथयामि। तेन असत्यभाषणमपि न कर्तव्यम्, न वा प्रतिज्ञाभङ्गोऽपि। वयस्यौ, न जाने किं कारणम्, परम्

अस्तमितो मे आनन्दः, शून्यं मे हृदयम्, बहुरत्नाऽपि वसुन्धरा मरुभूमिरेव मे प्रतिभाति। इमानि पञ्चमहाभूतानि– पृथिवी, आपः, तेजः, वायुः, आकाशः, किं बहुना सुवर्णवर्णं सूर्यमण्डलमपि प्राणहरेण विषवाष्पेण धूसरमिव मे आभाति। वस्तुतः मानवसृष्टिर्नाम विधातुः निर्माणकौशलस्य परिसीमा। अहो मेरुरिव उत्तुङ्गा मानवस्य प्रज्ञा,नास्ति कश्चिद् अविषयस्तस्याः, अपूर्वमस्य क्रियाकौशलम्, बृहस्पतिरिव त्रिकालदर्शी अयम्, किं बहुना चराचरसृष्टेः मुकुटमणिः अयम्। परं मम अयं मानवः सिकताकण इव क्षुद्रः प्रतिभाति। इमे स्वभावकुटिलाः पुरुषाः, इमाश्च प्रकृतिचञ्चलाः स्त्रियः दूरतः परिहर्तव्याः। युवयोः स्मितमेव अत्र निदर्शनम्।

मञ्जुलः – कुमार, नायमावयोः अभिप्रायः।

चन्द्रसेनः – तर्हि किंनिमित्तं युवयोः स्मितं, यदाहम् उक्तवान् पुरुषा दूरतः परिहर्तव्याः ?

वञ्जुलः – एवमावयोरभिप्रायः; यदि नाम पुरुषाः दूरतः परिहर्तव्याः, कथं खलु कुशीलवान् संमानयेत् कुमारः ? अत्र आगमनात् पूर्वमेव केचित् कुशीलवा मम दृष्टिपथम् आगताः। कुमारं विनोदयितुम् अचिरादेव ते राजमन्दिरं प्राप्स्यन्ति।

चन्द्रसेनः – के नाम एते नटाः ?

मञ्जुलः – इमे नटाः भरतमुनेः परम्पराम् अनुवर्तन्ते। तव बहुमतम् 'ऊरुभङ्गम्' नाम नाटकम् एतैरेव पूर्वम् अभिनीतम्।

(नेपथ्ये तूर्यनिर्घोषः। ततः प्रविशति शालेयः।)

शालेयः – जयतु जयतु कुमारः। शुभां वार्तां निवेदयितुं संप्राप्तोऽस्मि।

चन्द्रसेनः – अमात्य, अहमपि ते शुभां वार्तां कथयामि। पुरा किल अवन्तिपुर्यां भरतो नाम नटः 'कंसवधं' नाम नाटकम् अभिनीतवान्।

शालेयः (जनान्तिकम्) – अहो अस्य मत्तप्रलपितमपि घुणाक्षरमिव सत्यम्। (प्रकाशम्) कुमार, नटवृन्दः त्वदाज्ञां प्रतीक्षमाणः बहिस्तिष्ठति।

चन्द्रसेनः – सर्वं जगदिदं रङ्गमञ्चः, तत्र सर्वेऽपि प्राणिनो नटाः। तत्र को विशेषः अस्य नटवृन्दस्य ?

शालेयः – कुमार, जगतीतले विख्यातोऽयं नटवृन्दः। दुःखान्तम्, सुखान्तम्, प्रकरणम्, प्रहसनम्, ईहामृगः, व्यायोगः, वीथिः इत्यादिकम्, ऐतिहासिकं

सुखान्तं प्रकरणम्, दुःखान्तम् ऐतिहासिकं प्रकरणं, शृङ्गारहाटं, पद्मप्राभृतकम्, पादताडितकं, उभयाभिसारिकम्, सुखान्तं पादताडितकम्, सुखदुःखान्तं पादताडितकम्, ऐतिहासिकं पादताडितकम्, चाक्षुषम्, श्राव्यम्, चाक्षुषश्राव्यं वा नाटकं नाटयितुं कुशला इमे कुशीलवाः। संक्षेपेण चेद् वक्तव्यम्, रसभावसमुज्ज्वलं कमपि नाट्यप्रकारम् अभिनेतुम् इमे निपुणाः। मधुरकोमलविलासिनी कालिदासस्य भारती, धीरगभीरवाहिनी भवभूतेः सरस्वती, अनयोः समन्वयः अस्मिन् नटवृन्दे एकसंस्थः।

चन्द्रसेनः – भोः पुराणपुरुष कण्वमुने, कीदृशं ते कन्यारत्नम्?

शालेयः – कीदृशम्?

चन्द्रसेनः – असाधुदर्शिनः तस्य व्रतपरायणा निरतिशयलावण्या प्रथमे वयसि वर्तमाना दुहिता आसीत्।

शालेयः (स्वगतम्) – नक्तंदिवं मल्लिकामेव अनुध्यायति।

चन्द्रसेनः – तातकाश्यप, अपि सत्यमेतत्?

शालेयः – अस्ति ममापि तातकाश्यपस्य काचित् शकुन्तला, यस्याम् अहम् अतीव वत्सलः। तस्यां किल कश्चिद् उदारचरितो राजर्षिः अनुरक्तः।

चन्द्रसेनः – परं सा दुर्वाससः शापेन प्राणप्रियाद् वियोजिता। अमात्य, न कोऽपि ललाटलिखितं परिवर्तयति।

(ततः प्रविशन्ति चतुष्पञ्चाः नटाः।)

नटाः – जयतु जयतु कुमारः।

चन्द्रसेनः – स्वागतं भरतकुमाराणाम्। संतुष्टोऽस्मि भवद्दर्शनेन। चिरेण खलु दृष्टा यूयम्। अयं तावत् नाट्याचार्यः कात्यायनगोत्रः चन्द्रकेतुः। वयस्य, अचिरोद्गतं तव श्मश्रु। इयम् अवन्तिसुन्दरी मेनका। मेनकेव मधुरदर्शना। एष हि पुराणनाटकविद् सुकुमारगायकः भारद्वाजः।

चन्द्रकेतुः – युवराज, अस्ति नारायणदत्तेन प्रणीतं ‘ वारुणीचषकं ’ नाम किमपि अपूर्वं नाटकम्। तद् भवतः पुरतः अभिनेतव्यम्, इति अस्माकं संकल्पः। तद्दर्शनेन अनुग्राह्या वयम्, इति सप्रश्रयं प्रार्थयामहे।

चन्द्रसेनः – वयमपि नितरां समुत्सुकाः अभिनवं नाटकं द्रष्टुम्। परं गतवर्षे युष्माभिः दुर्गोत्सवे अभिनीतं ‘ मातङ्गवधं’ नाम नाटकं पुनरपि द्रष्टुमिच्छामि

चन्द्रकेतुः – यथा रोचते कुमाराय। चिरमभ्यस्ता वयं तन्नाटकस्य प्रयोगे।

चन्द्रसेनः – साधु। परं वस्तुगतिमनुरुध्य तत्र परिवर्तनं किंचिद् अवश्यं करणीयम्।

चन्द्रकेतुः – आदिशतु कुमारः। संनद्धा वयं परिवर्तनम् अभिनन्दितुम्।

चन्द्रसेनः – अहो प्रशस्येयं प्रयोगशीलता कुशीलवानाम्। अस्मिन् नाटके नूतनं कमपि संवादं संनिवेशयामि। स सर्वोऽपि कण्ठगतः करणीयः। अपि शक्यमेतत् ?

चन्द्रकेतुः – कुमार, लीलया शक्यम्।

चन्द्रसेनः – तद् अद्य रात्रौ नटवृन्देन सह अत्रैव आगच्छ। प्रयोगात् पूर्वमेव संवादं सुविहितं करिष्यामः। अमात्य, इमान् कुशीलवान् सत्कृत्य सुखनिवासार्थम् अतिथिशालां प्रवेशय। तेभ्यो राजभोजनं देहि।

शालेयः – कुमार, अलं चिन्तया। सर्वोऽपि अभ्यागतः स्वपात्रतानुसारं संभावनां लभते दुर्गराज्ये।

चन्द्रसेनः – अलमनया पात्रापात्रविचारणया। यदि पात्रता एव संभावनाया निकषः स्यात्, तर्हि कषाघातेनैव सर्वे संभावनीयाः स्युः। अतः अस्मद्विभवानुरूपं ते संभावनीयाः। न हि क्षुद्रेष्वपि अदक्षिणा भवन्ति दुर्गराजाः। तदेतान् अतिथिशालां नेतुमर्हसि।

शालेयः – यथाज्ञापयति कुमारः। इतस्तावदार्यमिश्राः।

(निष्क्रान्ता नटाः।)

चन्द्रसेनः – वञ्जुलमञ्जुलौ, श्वः रात्रौ 'मातङ्गवधं' द्रष्टुम् अवश्यम् आगन्तव्यम्।

वञ्जुलमञ्जुलौ–यथाज्ञापयति कुमारः।

(निष्क्रान्तौ वञ्जुलमञ्जुलौ।)

चन्द्रसेनः – गताः सर्वे। लब्ध इदानीमेकान्तः। हन्त कीदृशी मे अधोगतिः। नास्ति मत्समः कृतघ्नः, नास्ति मदन्यः पापिष्ठः। अयं नटः अश्रुपातेन, भ्रूभङ्गेन, स्वरभेदेन, हसितेन, रुदितेन वा तत्तदवस्थानुकृतिं कुर्वन् विक्षोभ-पीडितः, शुष्कवदनः, भावैकतानः, तत्तत्पात्रमयो भूत्वा, नवरसपरिप्लुतं लोकचरितं लीलया नाटयति। कस्य कृते एतत् ? तस्य खेदः, शोकः, हर्षो वा

सर्वमलीकम्। का तस्य उर्वशी ? को वा अयम् उर्वश्याः ? किं तस्य द्रोणवधेन ? किं वा अश्वत्थाम्नः शोकेन ? परं यदि वस्तुत एव अयं नटः पितृवधेन मातृभ्रंशेन च अहमिव प्रक्षुब्धः स्यात्, स किं किं न कुर्यात् ? अश्रुजलेन रङ्गभूमिं विप्लावयेत्, वज्रपरुषैः शब्दैः श्रोतॄणां कर्णौ विदारयेत्, अपराधिनो हृदयं विस्फोटयेत्, निरपराधमपि भीषयेत्, अज्ञमपि दिङ्मूढं कुर्यात्, सर्वेषाम् इन्द्रियाणि विक्षोभयेत्। अहं पुनः मृत्पिण्ड इव विगतचेतनः, क्लीब इव निस्तेजाः, निरुद्यमेन कालं यापयामि। कुतो मे भयम् ? किं तातवधं मनसाऽपि प्रतिकर्तुं न शक्नोमि ? यदि पितृवधस्य प्रतीकारं करोमि, तत् किं मां कश्चित् दुर्वृत्तं ब्रूयात् ? कश्चित् मे शिरश्छिन्द्यात् ? कश्चिद् रोमाणि लुञ्चेत् ? नैवं भवेत्। परं ममैव पौरुषम् अस्तमितम्। शव इव निष्क्रियोऽहम्। पितृघातिनः शासनं चिन्तयितुमपि न क्षमः। अहो, कुतो नु खलु पूर्वमेव क्रोधान्धेन मया न निहतो नरपशुः ? कुतस्तस्य मांसखण्डैः न संतर्पिता गृध्रवायसाः ? भ्रातरं निहत्य, मातृकल्पां भ्रातृजायां भ्रंशयन् अयं न मनुष्यः, किन्तु पुच्छविषाणहीनः पशुरेव। कदा नु खलु अस्य निष्कृतिं करिष्ये ? परशुराम धन्यस्त्वम्। क्षत्रात् तातवधं श्रुत्वा एकविंशतिवारं निःक्षत्रियां क्षितिं कुर्वता त्वया आविष्कृतं स्वतेजः। अहं पुनः तातवधं मातृभ्रंशं च ज्ञात्वाऽपि, तातपिशाचेन दण्ड्यं दण्डयितुमादिष्टोऽपि, शिखण्डीव अकिंचित्करो जीवामि। धिङ् माम्, धिङ् माम्।.... परम् एवं मया श्रुतम्। यदि अपराधी नाटके स्वकृतस्य वधस्य अनुकृतिं पश्यति, तदानीं मायया अभिमन्त्रित इव, आत्मानं नियन्तुमशक्नुवन् तारस्वरेण उद्घोषयति, 'मयैव अयं हत' इति। वाग्विहीनोऽपि वधः अशरीरया वाचा आत्मानं प्रकाशयति। तदेभिः कुशीलवैः पितृव्यस्य पुरतः तातवधानुकारि ' मातङ्गवधं ' नाम नाटकं नाटयिष्यामि। तच्च नाटकं तस्य चित्तवृत्तिं कथं विकारयति, इति निपुणम् अवलोकयामि। तस्य मुखविकृतिं सावधानं निर्वर्णयामि। अमोघोऽयम् उपायः तस्य अपराधं विनिश्चेतुम्। यदि विकृतः मम दृष्टिं परिहरति, तर्हि अवितथं पिशाचभाषितम्, स एवायमपराधी इति निश्चेतुं शक्यम्। परं यदि अविचलः प्रसन्नेन मनसा समग्रं नाटकं पश्यति, तदानीं नायमपराधी, असत्यं पिशाचभाषितम् इति निर्णेतव्यम्। यतः कामरूपाणि रक्षांसि मारीचो जानकी-

मिव दुःखोपहतं विमोह्य नाशयन्ति इति किल श्रूयते। अतः इदं छायानाटकं पिशाचवाक्यादपि प्रबलतरं प्रमाणं भविष्यति।

तृतीयः प्रवेशः।

(राजप्रासादे राजा, राज्ञी, शालेयः, मल्लिका, वञ्जुलमञ्जुलौ च उपविष्टास्तिष्ठन्ति।)

राजा – वञ्जुलमञ्जुलौ, चन्द्रसेनस्य उन्मादकारणम् अन्वेष्टुं युवाम् आदिष्टौ। कः समाचारः? अपि ज्ञातं किंचित्? कुतस्तस्य अशान्तिः?

वञ्जुलः – क्षुब्धं मे मानसम्, इति स स्वयमेव वदति। परं किं कारणमस्य क्षोभस्य, इति शतशः पृष्टोऽपि न किंचित् प्रतिवदति।

मञ्जुलः – धूर्तः सः। उन्मादम् अभिनीय रहस्यं संहरति। कुण्ठिता भवति अस्माकं मतिः। स खलु अन्यत् पृष्टः अन्यदाचष्टे।

राज्ञी – कीदृशी तस्य वृत्तिः युवामन्तरेण?

वञ्जुलः – अतिदक्षिणः स अस्मासु।

मञ्जुलः – परं कृतकं तद् दाक्षिण्यम्।

वञ्जुलः – स स्वयं न पृच्छति; पृष्टस्तु स्वैरं भाषते; परं न कदापि आन्तरं भावं प्रकाशयति।

राज्ञी – अपि प्रयुक्तः कश्चिदुपायः तस्य मनो रमयितुम्?

वञ्जुलः – अनायासेनैव एवं संवृत्तम्। अवन्तिनगराद् अकस्माद् आगतं नटवृन्दं दृष्ट्वा हर्षोत्फुल्लं तस्य मानसम्। अद्य किल रात्रौ किमपि नाटकं प्रयोक्तव्यम्, इति नटवृन्दः आदिष्टः कुमारेण।

शालेयः – सत्यमाह वञ्जुलः। तत् नाटकं देवेन सपरिवारं द्रष्टव्यम् इति मन्मुखेन प्रार्थयते चन्द्रसेनः।

राजा – दिष्ट्या लब्धः तस्य विनोदनोपायः। प्रीतेन मनसा आगच्छामः, इति निवेद्यतां कुमारः। नानारसं नाट्यं दृष्ट्वा प्रसन्नं भवेत् कुमारस्य मनः इत्याशास्महे।

वञ्जुलमञ्जुलौ – यदाज्ञापयति देवः।

(इति निष्क्रान्तौ ।)

राजा – प्रिये वसुमति, क्लान्तं ते मुखम्। तदर्हसि शयनमन्दिरे विश्रमितुम्। अस्वस्थः कुमारः इतस्ततः परिक्रामति। मल्लिकाऽपि अत्र समागता। परस्पर-दर्शनेन प्रीतयोस्तयोः विश्रब्धः संलापो भविष्यति। आवामपि यवनिकान्तरितौ भूत्वा तयोः संवादं श्रोष्यावः। संवादं श्रुत्वा मुखविकारं निरीक्ष्य, सुशकमेतत् निर्णेतुम्, किं प्रणयः उन्मादस्य कारणम् उत अन्यत् किमपि।

राज्ञी – उदारः कल्पः। वत्से, यदि मदन एव चन्द्रसेनस्य उन्मादकारणं, तत् स्वाधीनः उपायः अस्माकम्। इयं मदनकलिका मल्लिका एव तस्य औषधं भविष्यति।

(मल्लिका वसुमतीं प्रणमति।)

राज्ञी – वत्सयोः मङ्गलं भूयात्, इति दुर्गां प्रार्थये।

मल्लिका – अम्ब, न ते वचनम् अन्यथा भविष्यति।

राज्ञी – आर्यपुत्र, साधयामि। (निष्क्रान्ता राज्ञी।)

शालेयः – मल्लिके, पुष्पावचयमिषेण त्वमत्रैव संचर। देव, वयमपि अन्तर्हिता भवामः। वस्तुतः न युक्तमेतद् अन्यद् वक्तव्यम, अन्यदाचरितव्यम्। परं विषमेऽस्मिन् संसारे महान्तोऽपि पुण्यापदेशेन पापम् आचरन्ति।

राजा (स्वगतम्) – दारुणोऽयं वाक्प्रहारः मम हृदयं विदारयति। वाराङ्गना जराविकृतमपि मुखम् अङ्गरागेण मण्डयति। अहमपि पापमलिनं चरितं मधुरालापैः प्रसाधयामि। कष्टम्, दुःसहोऽयं पापभारः। न जाने किमत्र कर्तव्यम् ?

शालेयः – देव, इत एव आगच्छति कुमारः। तद् गच्छावः।

(निष्क्रान्तौ उभौ। ततः प्रविशति निर्विण्णश्चन्द्रसेनः।)

चन्द्रसेनः – (स्वगतम्) – अहो ! न ज्ञायते किं जीवितं श्रेयः उत मरणम्। किं प्राणानुपलालयता मया कृतान्तस्य अशनिप्रहाराः दुःखं निरुध्य सोढव्याः, उत जीवितनिरपेक्षं संगरं कृत्वा आपद्राशयः समूलम् उन्मूलनीयाः। अपि नाम मृत्युमाश्रये ? परं को नाम मृत्युः ? मृत्युर्नाम गाढस्वापः, आधिव्याधि-शून्यः, हर्षविषादरहितः। परं किम् एवंविधेन आत्मघातेन देहसुलभानि दुःखानि परिहर्तुं शक्येरन् ? यदि शक्येरन्, को नाम नाभिनन्देत् ईदृशं

देहान्तम्? तदिदं मरणं नाम चिरनिद्रा। परं तत्र स्वप्नोऽपि कदाचित् संभवति। तथा सति, पुनरपि विषमम् आपतितम्। अथवा कः स्वप्नो देहबन्ध-रहितस्य? सर्वमिदं चिन्तयितुं नास्ति अस्माकं बुद्धिविभवः। अत एव प्राणिभिः दुःखशतानि अनुभूय प्राणाः परिरक्ष्यन्ते। अन्यथा कः खलु विषहेत कालपुरुषस्य दण्डप्रहारान्, शस्त्रपाणेः परपीडनम्, दर्पोद्धतस्य वाक्पारुष्यम्, कामार्तस्य प्रियापरिभवम्, न्यायसभायाः कालहरणम्, राजपुरुषाणाम् अविनयम्, खलपुरुषाणां सुजनविमाननाम्? सर्वथा दारुणमिदं मनुजजीवनम्। अपि नाम कश्चिद् आत्मघातेन मुच्येत अस्माद् यातनाप्रपञ्चात्? तथा सति, कः खलु इमां कष्टबहुलां जीवनयात्रां विषहेत? परं मृत्योः परं अचिन्त्यः परलोकः। तत्र अविदितानि दारुणतराणि दुःखानि कदाचित् तम् अभिभवेयुः, इति विचिन्त्य आत्मघातान् निवृत्य मनुजः दुःखबहुलं जीवनं सहते। अयं तत्त्वान्वेषः बुद्धिमन्तं क्रियाशून्यं कृत्वा व्यवसायात् परावर्तयति। तेन अस्य क्रियासंकल्पाः दरिद्रस्य मनोरथा इव उत्पन्नमात्रा विलयमुपयन्ति। अहो केयम्? इयं मल्लिका, मम नेत्रनिर्वाणम्। प्रिये मम पापक्षयार्थम् ईश्वरं प्रार्थयस्व।

मल्लिका – अये चिरेण खलु दृष्टः कुमारः। अपि कुशलं कुमारस्य?

चन्द्रसेनः – धन्योऽस्मि, अद्यापि मां अमात्यदुहिता स्मरति। कुशलं मे अमात्यकृपया।

मल्लिका – कुमार, पुरा किल अनुरक्तेन भवता इदमङ्गुलीयकं मह्यं समर्पितम्। तदधुना प्रत्यर्पयितुं इच्छामि। तत्स्वीकारेण अनुगृह्णातु मां कुमारः।

चन्द्रसेनः – न खलु मया तुभ्यं किमपि समर्पितम्।

मल्लिका – राजकुमार, किं न स्मरसि स्वयं समर्पितम् इदं रत्नखचितं अङ्गुलीयकम्? वसन्तोत्सवे ‘त्वयि मे भावनिबन्धना रतिः’ इति उक्त्वा दुर्गासमक्षम् इदं अङ्गुलीयकं त्वया मम कराङ्गुलौ स्वयं निवेशितम्। विलयं गते तादृशे अनरागे, किम् अनेन अङ्गुलीयकेन? तदेव मधुरं प्रेमोपायनं, यत्र प्रियस्य मनः संलग्नम्।

चन्द्रसेनः – अमात्यकन्यके, अपि विशुद्धं ते शीलम्?

मल्लिका – कुमार, किमेवं मन्त्रयसे?

चन्द्रसेनः – अपि अनवद्यं ते रूपम् ?

मल्लिका – कुमार, किमिदम् उपक्रान्तम् ?

चन्द्रसेनः – एवं विशुद्धं ते शीलम्, अनवद्यं रूपम् इति उभयमपि त्वयि एकसंस्थम्। तत् सावधाना भव। मा नाम शीलं भ्रश्यतां रूपसंगात्।

मल्लिका – कुमार, ननु शीलं रूपस्य भूषणं, न तु दूषणम्।

चन्द्रसेनः – मुग्धे, परं रूपं शीलस्य दूषणम्। सौन्दर्य सतीमपि वाराङ्गनां करोति। परं शीलं सुन्दरीं सुशीलां कर्तुं न प्रभवति। रूपवती स्त्री दुःशीला इति अयं वदतो व्याघातः इति मे पूर्वमभात्, अधुना तु न तत्र विसंवादं पश्यामि। कदाचित् कृतः स्यात् मया त्वयि प्रणयः।

मल्लिका – मयाऽपि तथैव विश्वसितम्।

चन्द्रसेनः – किमर्थं विश्वसितम् ? सहकारं समाश्रिताऽपि विषवल्ली न जहाति विषभावम्। चन्दनवृक्षं समाश्रितोऽपि फणी विषमेव उद्गिरति।मधुरवचनोऽपि नाहं प्रकृतिसहजां कुटिलतां विजहामि। न खलु मे परमार्थतः त्वयि रतिरासीत्।

मल्लिका – तर्हि बुद्धिपुरस्परं विप्रलब्धाऽस्मि।

चन्द्रसेनः – तत् काषायं परिधाय श्रमणा भव। अन्यथा पापशतं प्रसविष्यसि। मां जनयित्वा मम माता दोषशतं प्रसूता। शीलसंपन्नोऽपि अहं न सर्वथा दोषमुक्तः। अहं दर्पान्धः, स्वार्थपरायणः, अहंमन्यः दीर्घद्वेषी, द्विजिह्वः। मनसाऽपि अचिन्तनीयानि असंख्यानि दुरितानि मया आचरितानि, यानि जन्मशतेऽपि क्षालयितुं न शक्यन्ते। त्रिशङ्कुरिव अन्तराले संचरन्तः मादृशाः पामराः किं नु खलु साधयन्ति। अलमेतेषु धूर्तेषु विश्वस्य। तदपेक्षया काषायं परिधाय श्रमणा भव।........ क्व ते तातः ?

मल्लिका – कुमार, गृहे तिष्ठति।

चन्द्रसेनः – निरुद्धप्रसरः पिहितद्वारे गृहे एव तिष्ठतु। तत्रैव विडम्बयतु मर्कटलीलाम्। त्वमपि विहारमाश्रित्य तपश्चर।

मल्लिका (स्वगतम्) – अयि अम्बिके, दुर्ग, परित्रायस्व कुमारम्। न सहे इमां तस्य अवस्थां द्रष्टुम्।

चन्द्रसेनः – यदि मम उपदेशम् अनादृत्य परिणयसि, अयं ते शापः भविष्यति, 'काममस्तु पावक इव पवित्रं, गङ्गाजलमिव विमलं ते चरितम्, अथापि न शक्नोषि कौलीनाद् आत्मानं मोचयितुम्'। तत् काषायं परिधाय श्रमणा भव। यदि च परिणये ते आग्रहः, मूढमेव वरयस्व। यतः योषितः खलु मोहजालं प्रसार्य पुरुषान् पशुकोटिं प्रापयन्ति, इति विदितमेव धीमताम्। अतः श्रमणा भूत्वा विहारं गच्छ। त्वरितं प्रतिष्ठस्व।

मल्लिका – हे प्रभो, शमय कुमारस्य संतापम्।

चन्द्रसेनः – अहो मुखरागकौशलं प्रमदानाम्। विधातुः सकाशाद् अधिगतम् अन्यदेव नारीणां रूपम्, अन्यदेव च रागरञ्जितम्। ताः किल कोकिल इव मधुरं कूजन्ति, हरिणीव चञ्चलं पश्यन्ति, हंसीव सविलासं गच्छन्ति, अङ्गविभ्रमैः अनिमित्तं परिहसन्ति, स्वैराचारं कृत्वाऽपि मुग्धभावं नाटयन्ति। अन्यं मधुरवचनैः मोहयन्ति, अन्यं कटाक्षविक्षेपैः पश्यन्ति, अन्यस्य हृदयं हरन्ति, अन्यं हृदयेन चिन्तयन्ति। सालावृकाणां हृदयानि तासाम्। न मे विश्वासः स्त्रीषु, नोत्सहे स्त्रियं पुरतो द्रष्टुम्। नानुजानामि अतःपरं कस्यापि विवाहमङ्गलम्। जीवन्तु नाम ते, यैः पूर्वमेव परिणीतम्। परम् अस्ति तत्रापि कश्चिदपवादः। अतःपरम् अन्ये दुर्गवासिनः ब्रह्मचारिणः स्थास्यन्ति। तत् काषायं परिधाय श्रमणा भव।

मल्लिका – हन्त केयं दुरवस्था? अयं खलु महात्मा निखिलस्य राजमण्डलस्य ललामभूतः, शूराणामग्रणीः, बुद्धिमताम् अग्रेसरः दुर्गराज्यस्य आशानिधानम्, शिष्टाचारस्य मानदण्डः, दाक्षिण्यस्य निधिः, दीनानां कल्पवृक्षः, किं बहुना निखिलानां पुरुषगुणानाम् आयतनम्। अहह कष्टं, सर्वमपि विलयं गतम्। यस्य प्रणयालापाः मम कर्णरसायनम् अभूत्, यस्य प्रेमस्पर्शेन पुलकितं मे गात्रमभूत्, स एव अधुना....हन्त धिङ् मां हतभागिनीम्। क्व सा अकुण्ठिता बुद्धिः, क्व चेयं जडमूढता। पुरा मधुरं गायन्ती वीणा अधुना वितन्त्रीः भूत्वा कर्णकर्कशम् आक्रोशति। विलोभनीयमस्य यौवनम् उन्मादेन पर्युषितं कुसुममिव म्लानम् अभूत्। विषमविधे, यमेव क्षणात् विभवशिखरम् आरोपयसि तमेव अन्यस्मिन् क्षणे दुःखपङ्के निमज्जयसि। या नाम अहं कुमारस्य प्रणयेन पुलकिता अभवम्, सा एव अधुना तस्य विरसभावेन विफलजीविता भवामि।

(मुखमावृत्य रोदिति । जवनिकां दूरीकृत्य प्रविशतः राजा अमात्यश्च ।)

राजा – अमात्य नेयं मदनबाधा, न वा उन्मत्तप्रलपितम् । ईषद् असङ्गतमपि तस्य वचनं न अर्थशून्यम् । अस्ति किञ्चिदस्य चिररूढं हृदयशल्यं, यत्तं पुनःपुनः संतापयति । समये एव अप्रतिकृतो व्याधिः परिणामे अनर्थं जनयति । तत् कश्चिदुपायः सत्वरम् अन्वेषणीयः । अतः उपेक्षितं राजदेयम् आहर्तुं चन्द्रसेनः त्वरितम् अङ्गदेशं प्रेषणीयः, इति अस्माभिः निर्णीतम् । तेन सागरम् उत्तीर्य अदृष्टपूर्वान् भूप्रदेशान् अवलोकयतः चन्द्रसेनस्य हृदयशल्यं कदाचित् स्वयमेव उद्धृतं भविष्यति । किममात्यो मन्यते ?

शालेयः – शोभनः उपायः । परम् अवधीरितः प्रणयः एव अस्य विकारस्य मूलम्, इति अहं पश्यामि । मल्लिके, यत् कुमार आह, तत् सर्वं श्रुतम् अस्माभिः। तद् विश्रमितुम् अर्हसि । (निष्क्रान्ता मल्लिका ।) देव, अहमेवं मन्त्रये, यद् अद्य रात्रौ नाट्यप्रयोगादनन्तरं तमेकान्ते आहूय, देवी स्वयं पृच्छतु, किं तस्य हृदयशल्यमिति । मातृवात्सल्येन आवर्जितः सोऽपि कदाचित् मुखरो भवेत् । परं तत्रापि संभवति कश्चित् प्रत्यवायः । ज्ञातमपि रहस्यं सुतपक्षपातेन देवी महाराजस्य न निवेदयेत् । अतः अहमपि समीपवर्ती भूत्वा तयोः संवादं निभृतं श्रोष्यामि । कुटिलाऽपि इयं नीतिः राजहिताय आदरणीया भवति । अपि अनुमतमेतद् देवस्य ? यदि अयमपि उपायः विफलो भवति, तर्हि अङ्गदेशाय प्रेषणमस्य अवस्थितमेव ।

राजा – को दोषः ? न कदापि उपेक्षणीयं राजपुत्राणां स्वच्छन्दवर्तनम् ।

चतुर्थः प्रवेशः

(दुर्गस्थः प्रासादः । चन्द्रसेनः, शालेयः, वञ्जुलमञ्जुलौ अन्ये च ।)

चन्द्रसेनः – अमात्य अपि अभिनन्दितं मम निमन्त्रणं देवेन देव्या च ?

शालेयः – सानन्दम् अभिनन्दितम् । अचिरादेव आगमिष्यति देवः सपरिवारः ।

चन्द्रसेनः – तेन हि आदिश्यन्तां कुशीलवाः त्वरयितुम् । वञ्जुलमञ्जुलौ युवामपि अमात्यस्य सहायौ भवतम् ।

शालेयः – यथाह कुमारः । (निष्क्रान्ताः सर्वे ।)

चन्द्रसेनः – अयि भोः हर्षनाद,

हर्षनादः – (प्रविश्य) कुमार, अयमहं भोः । वद किमनुष्ठेयम् ?

चन्द्रसेनः – वयस्य, त्वां विहाय न कमपि समबुद्धिं पश्यामि ।

हर्षनादः – वयस्य, अलं वृथाप्रशंसया ।

चन्द्रसेनः – हर्षनाद, नेयं मिथ्याप्रशंसा । को नाम दरिद्रं प्रशंसेत् ? शीलमेकं विहाय नास्ति किंचित् तव स्वम् । कथमपि शरीरयात्रां निर्वहसि । कार्यार्थी जनः चाटुवादैः, लाङ्गूलचालनैः, चरणस्पर्शनैः धनिनं प्रसादयति । हर्षनाद, अस्ति मे बुद्धिः सदसद् विवेक्तुम् । अतः परीक्ष्यैव त्वया सह सख्यं कृतम् । यतो हि न त्वं श्रियः प्रसादम् अभिनन्दसि, न वा कोपं गणयसि । सुदुर्लभः खलु त्वादृशः समदुःखसुखो धीरः । उत्सवे व्यसने वापि न मां कदापि परित्यजसि । अत एव त्वं मे विश्वासभाजनम् । आस्तां तावत् । अद्य रात्रौ राज्ञः समक्षं मातङ्गवधं नाम नाटकं प्रयोक्ष्यते । तस्य कथावस्तु तातवधम् अनुकरोति । अतः तत् नाटकं पश्यतः मम पितृव्यस्य मुखविकारं सावधानं निरीक्षस्व । विषप्रयोगेण राजवधं दृष्ट्वा भिन्नं मे रहस्यम्, इति कम्पितं भवेत् तस्य हृदयम्, भयेन विवर्णं भवेत् तस्य मुखम् । तस्य निगूढं पापं हृदयबन्धं भित्त्वा धारासहस्रेण प्रवहेत् । परं नाटकं दृष्ट्वाऽपि यदि अविकृतं तस्य मुखं, तदा अविश्वास्यं अनर्थकारिणः पिशाचस्य वचनम् । अहमपि अनन्यदर्शनः पितृव्यस्य आशयम् अवलोकयामि । समाप्ते नाटके, तथ्यं निर्णयावः ।

(नेपथ्ये तूर्यनादः ।)

हर्षनादः – अवहितो भव । नाट्यं द्रष्टुं सपरिवारो राजा इत एव आगच्छति ।

चन्द्रसेनः – तेनाहं मूढभावमभिनयामि, त्वमपि आसनस्थो भव ।

(नेपथ्ये तूर्यघोषः । ततः प्रविशति राजा, राज्ञी, शालेयः, मल्लिका, परिवारश्च ।)

राजा – कच्चित् कुशलं कुमारस्य ? अपि प्रसन्ना ते चित्तवृत्तिः ?

चन्द्रसेनः – प्रसन्ना मे वृत्तिः । पवनभक्षी पन्नग इव प्रतिश्रुतेन राजपदेन उपचीयमानगात्रः सानन्दं विहरामि । न हि यागपशुरपि एवम् अनायासेन पोषयितुं शक्यते ।

राजा – चन्द्रसेन, असंगतं भाषसे।

चन्द्रसेनः – देव, विसंगतं पृच्छसि। अमात्य, त्वमपि नटवद् व्यवहरसि।

शालेयः – अहो सूक्ष्मेक्षिका कुमारस्य। पुरा किल कृष्णजन्मोत्सवे मया बहुवारम् अभिनीतम्। रसिकैरपि अभिनन्दितं मम अभिनयकौशलम्।

चन्द्रसेनः –किं नाटकम् अभिनीतम्?

शालेयः – कंसवधं नाम नाटकम्। तत्राहं कंसः अभूवम्। मथुरायां मुष्टियुद्धे कृष्णो मां जघान।

चन्द्रसेनः – अहो अब्रह्मण्यम्, अब्रह्मण्यम्। त्वादृशं पुरुषोत्तमं हत्वा तेन महत्पापमाचरितम्।....अपि सज्जाः कुशीलवाः?

वञ्जुलः – कुमार, कृतनेपथ्यास्ते भवदाज्ञां प्रतीक्षन्ते।

राज्ञी – वत्स चन्द्रसेन, एहि। मत्समीपम् उपविश।

चन्द्रसेनः मातः, नोत्सहे तव आज्ञामुलङ्घयितुम्; परं नार्हति राजहंसः कमलिनीं विहाय अन्यत्र विश्रमितुम्।

(मल्लिकाम् उपगच्छति।)

शालेयः (जनान्तिकम्)–देव, श्रुतं कुमारभाषितम्?

(परस्परं संज्ञां कृत्वा चन्द्रसेनं पश्यतः।)

चन्द्रसेनः – अयि लावण्यलतिके, आरोढुम् इच्छामि तव उत्सङ्गम्।

मल्लिका – अपेहि। अनुचितमेतत् गुरुजनस्य पुरतः।

चन्द्रसेनः – भीरु, किं मम परिहासमपि न जानासि? तव उत्सङ्गे शिरो निधाय नाटकं पश्यामि, इति उक्तं मया।

मल्लिका – कुमार, अद्य अपूर्वः कोऽपि ते आनन्दः।

चन्द्रसेनः – कथमेतत्?

मल्लिका – ननु दृश्यते एव।

चन्द्रसेनः – मल्लिके, राजमन्दिरे निवसन्नपि नाहं सुखितः। तद् दुःखशतानि सोढ्वापि स्मेरमुखेनैव भवितव्यं मया। अपूर्व आनन्दस्तु राजयोषिताम्। पश्य, कथं मम माता प्रमुदिता वर्तते। दिनद्वयमपि न जातम् उपरतस्य मे तातस्य। (राज्ञी मुखं परावर्तयति। राजा अमात्येन किमपि भाषते।)

मल्लिका – कुमार, कुतो दिनद्वयम्? मासचतुष्टयमतीतम्।

चन्द्रसेनः – अहो, कियान् कालः व्यतीतः। महानपि पुरुषः मरणादूर्ध्वं क्षणेनैव विस्मृतो भवति। गतं न शोचामि, कृतं न मन्ये, इत्येव जनरीतिः। तदधुना नास्ति शोकस्य अवसरः। अतःपरं नास्ति प्रत्यवायः कौशेयं परिधाय नृत्यगीतैः मदनोत्सवं कर्तुम्। हन्त, मासद्वयम् अतीतम्; तथापि दुर्गदेशाधिपतिः हृदयात् न निर्गतो भवति; कथमेतत्? अस्तु। किमर्थं कुशीलवाः चिरायन्ते?

सूत्रधारः – (प्रविश्य) महाराजाधिराज, देवि, कुमार, सामन्ताः, सामाजिकाश्च, अस्या अभिरूपभूयिष्ठायाः परिषदः पुरतः किमपि अपूर्वं नाटकं प्रयोक्तुं वयम् उद्यताः। तत् सर्वैः सावधानं श्रुत्वा दृष्ट्वा च अनुग्राह्या वयम्।

चन्द्रसेनः – अहो, संक्षेपरुचिः सूत्रधारः। अवश्यकथनीयमपि नाट्यवस्तु न निर्दिशति। किमयं नाटकस्य सूत्रधारः, उत व्याकरणस्य सूत्रकारः।

मल्लिका – अतिसंक्षिप्तेयं प्रस्तावना।

चन्द्रसेनः – स्त्रीणां क्षणभङ्गुरा प्रीतिरिव।

(ततः प्रविशति मातङ्गराजः पत्न्या सह।)

मातङ्गराजः – प्रिये, त्रिंशद् वर्षाणि अतीतानि अग्निं साक्षीकृत्य कृतस्य पाणिग्रहणस्य। एतस्मिन् काले, भगवान् सहस्ररश्मिः पृथिवीं परितः त्रिंशद्वारं प्रदक्षिणाः चकार। अस्मिन् काले सहस्रवारं भगवान् रोहिणीपतिः वृद्धिक्षयं संप्राप्तः। परम् आवयोः अनुरागः ध्रुव इव अचलः।

चञ्चला – यावत् सूर्याचन्द्रमसौ त्रिलोकीं प्रकाशयतः, यावत् सुरनदी जाह्नवी स्रोतसा त्रिभुवनं जीवयति, तावद् आवयोः प्रीतिः अविच्छिन्ना स्थास्यति। परम् इदानीं व्याधिग्रस्तम् आर्यपुत्रं दृष्ट्वा पर्याकुलं मे मनः। किमपि अनिष्टम् आशङ्के। परं प्रकृत्यैव कातराः स्त्रियः। तासां मनः अकारणमेव पर्याकुलं भवति। तद् अलं भयेन। वर्षशतं जीवेद् आर्यपुत्रः।

मातङ्गराजः – परं प्रिये, मम शरीरं प्रतिदिनं दुर्बलं भवति। इन्द्रियाणि शिथिलानि जायन्ते। इदं शरीरं विहाय कतिपयैरेव दिवसैः परलोकं गमिष्यामि। मयि उपरते, त्वं पुनः विरहकातरा मा भूः। अचिरादेव अनुरूपेण वरेण संगता ऐहिकान् भोगान् उपभुज्य मोदमाना तिष्ठ।

चञ्चला – शान्तं पापं शान्तम् पापम्। हे नाथ, त्वमेव इह जन्मनि जन्मान्तरे

च मम भर्ता। त्वदनन्तरं यदि अन्यं पति वरिष्यामि, नूनं नरकं गमिष्यामि। सा एव द्वितीयं पतिं वरयते, या स्वहस्तेन धर्मपतिं हन्ति

चन्द्रसेनः – (जनान्तिकम्) इयं विषवल्ली दर्शने मनोहरा, सेवने प्राणहरा।

चञ्चला – अतिविगर्हितोऽयं पुनर्विवाहो नाम। नायं धर्मशास्त्रेण विहितः, नाऽपि प्रणयेन प्रेरितः। किन्तु स्वार्थं साधयितुं जारिणीभिः समाश्रितः। अन्यं पतिं वृत्वा प्रथमं पतिं पिशाचयोनिं प्रेषयन्ति इमाः कुलटाः।

मातङ्गराजः – कामं त्वं सत्यसन्धा; नास्ति ते मनसि अन्यत् वचसि अन्यत्। परम् अयं कालचक्रस्य महिमा, यत् स्वयमपि गृहीतं व्रतं स्वयमेव परित्यजति जन्तुः। यावद् दृढो वृन्तवन्धः, तावदेव फलं वृक्षे लम्बते। शिथिले वृन्तवन्धे फलं वृक्षात् स्वयमेव पतति। पातिव्रत्यस्यापि इयमेव कथा। विगते भर्तरि पतिभक्तिरपि विलीयते। अतः काले काले कृतानां संकल्पानां विस्मरणमेव श्रेयः। अस्मिन् परिवर्तिनि संसारे यं विना क्षणमपि जीवितुं न शक्नुमः, तमेव कालान्तरे पुरतो द्रष्टुमपि नेच्छामः। जन्मनि जन्मनि अयमेव भर्ता भवतु, इति सावित्रीव्रतमाचरन्त्यः नार्यः मृते पत्यौ अन्यं पुरुषं वरयन्ते।

चञ्चला – हा धिक् हा धिक्। यदि अहं गतभर्तृका अन्यं पतिं वरिष्यामि, तर्हि पृथिवी मे अन्नम् अपहरताम्, सूर्याचन्द्रमसौ माम् अन्धतमसं नयेताम्। सर्वाश्च देवताः मम शान्तिं पुष्टिं तुष्टिं च विनाशयन्तु।

चन्द्रसेनः – अपि नाम परिपालयेत् इयं सतीव्रतम् ?

मातङ्गराजः – प्रिये चञ्चले, मूर्धन्यासि पतिव्रतानाम्। अधुना श्रान्तोऽहम्। निद्रया आकुले मे लोचने। स्वपिमि। (इति स्वपिति।)

चञ्चला – नाथ, सुखं स्वपिहि। सर्वाः कुलदेवताः अनिष्टं परिहरन्तु। माऽस्तु कदापि आवयोः विप्रयोगः। (इति निष्क्रान्ता।)

चन्द्रसेनः – अम्ब, अपि रोचते ते इदम् ?

राज्ञी – न जाने किमर्थम् इदं प्रतिज्ञाशतम्।

चन्द्रसेनः – परम् अम्ब परिपालयिष्यति सा स्वधर्मम्।

राजा – चन्द्रसेन, अपि श्रुतपूर्वं कथावस्तु अस्य नाटकस्य? मन्ये न तत्र किंचित् अकीर्तिकरं राजकुलस्य।

चन्द्रसेनः – किमत्र अकीर्तिकरम् ? केवलं कविकल्पितं कथावस्तु। वर्तते अत्र विषप्रयोगः, परं अलीकः सः।

राजा – किं नामधेयम् अस्य नाटकस्य ?

चन्द्रसेनः – 'मूषकजालम्'। इयं हि समासोक्तिः, यत्र अप्रस्तुतवृत्तान्तः प्रस्तुतमनुसरति। मथुरायां कृतस्य राजवधस्य आख्यानमिदम्। तत्र मातङ्गो नाम राजा, चञ्चला नाम तस्य पत्नी, उग्रवर्मा नाम भ्रातृव्यः। अतिभीषणम् इदम् आख्यानम्।....परं अलं चिन्तया। यो नाम कृतापराधः, भवतु तस्य चित्तविक्षोभः। किमर्थं भयं देवस्य शुद्धचरितस्य ?

(ततः प्रविशति उग्रवर्मा। बहुविधाः क्रूरमुद्राः प्रदर्शयति।)

मल्लिका – कुमार, नृत्यति खलु सरस्वती तव रसनायाम्।

चन्द्रसेनः – चाण्डाल, कृतम् आभिः भैरवमुद्राभिः। त्वरस्व। शृणु अयम् उलूकः अभद्रं विरौति। तदुपक्रमस्व राजहत्याम्।

उग्रवर्मा – अहो स्फुरति मे बाहुः एनं निहन्तुम्। घोरा तमिस्रा, प्राणहरं कालकूटं, विजनं वनम्। भूतप्रेतपिशाचाः परिक्रामन्ति। इदं हि कालकूटम् अमावास्यायां विषवल्लीमाहृत्य निष्पीडितम्। करालवदनां चामुण्डां संबोध्य अभिचारमन्त्रेण मन्त्रितम्। हे कालकूट, आसुरी हि तव माया। तस्याः प्रभावेण अस्य प्राणान् अपहर। अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तं हन्मि। (इति सुप्तस्य कर्णे विषं सिञ्चति।)

चन्द्रसेनः – पश्यतु तावत् देवः। प्रमदवने सुप्तं राजानं राज्यलुब्धः भ्रातृव्यः विषप्रयोगेण हन्ति। सर्वविदिता इयं लोककथा। अचिरादेव अयं राजघातकः राजपत्नीं भ्रंशयिष्यति।

(राजा विवर्णमुखः भयेन कम्पते।)

मल्लिका – अये उत्तिष्ठति महाराजः।

चन्द्रसेनः – देव, अलीकोऽयम्, अलीकोऽयं विषप्रयोगः। तं दृष्ट्वा किमर्थं भयकम्पः ?

राज्ञी – किमिति अस्वस्थः आर्यपुत्रः ?

शालेयः – विरमत विरमत। अलमनेन नाट्यप्रयोगेण।

राजा – शालेय, न मे रोचते इदं मर्कटचेष्टितम् । वसुमति उत्तिष्ठ ।

शालेयः – प्रज्वाल्यन्तां प्रदीपिकाः । (हर्षनादचन्द्रसेनौ वर्जयित्वा सर्वे निष्क्रान्ताः ।)

चन्द्रसेनः – वयस्य, पश्य नखरैः विदीर्णजठरः हिरण्यकशिपुः आर्तम् आक्रोशति, अन्यत्र संकटशतात् परिमुक्तः प्रह्लादः सानन्दं गायति । कश्चिद् जागर्ति, अन्यः स्वपिति । इयं लोकयात्रा, क्वचिद् विषमयी क्वचिद् अमृतमयी । वयस्य, यथार्थं पिशाचभाषितम् । नास्ति संशयः । हर्षनाद, अपि लक्षितः त्वया राज्ञो मुखविकारः ?

हर्षनाद : – स्फुटं लक्षितः ।

चन्द्रसेनः – अपि लक्षितं त्वया विषप्रयोगेण विदीर्णं महाराजस्य हृदयम् ?

हर्षनादः – निपुणमभिलक्षितम् ।

चन्द्रसेनः – वयस्य, जितं मया । यदेव चिन्तितं, तदेव परिणतम् । आनन्दस्य परां काष्ठां गतोऽस्मि । मेघदर्शनेन मत्तो मयूर इव नर्तितुमिच्छामि । राजहंस इव विहर्तुमिच्छामि । ललितमधुरं वेणुगानं श्रोतुमिच्छामि । कुत्र वर्तते वेणुः ?

(ततः प्रविशतः वञ्जुलमञ्जुलौ ।)

वञ्जुलः – कुमार, किंचिद् विज्ञापयितुमागतः । संक्षेपेण वच्मि ।

चन्द्रसेनः – किं संक्षेपेण ? सविस्तरं ब्रूहि ।

मञ्जुलः – कुमार, महाराजः खलु....

चन्द्रसेनः – किं तस्य ?

वञ्जुलः – स हि बलवदस्वस्थः ।

चन्द्रसेनः – किं सुरापानेन ?

मञ्जुलः – न हि, न हि, पित्तप्रकोपेण.... ।

चन्द्रसेनः – तेन हि धन्वतरिं गच्छ । अन्यथा मदीयम् औषधं सेवित्वा तस्य व्याधिः द्विगुणो भविष्यति ।

मञ्जुलः – कुमार, नार्हसि उपहसितुं मद्वचः । सावधानं शृणु ।

चन्द्रसेनः – अवहितोऽस्मि । उच्यताम् ।

वञ्जुलः – नाट्यदर्शनेन भृशम् उद्विग्ना तव माता । सा त्वाम् एवं विज्ञापयति ।

चन्द्रसेनः किमाज्ञापयति तत्रभवती ?

मञ्जुलः – सा खलु अद्य शयनात् पूर्वं स्वके मन्दिरे त्वां द्रष्टुम् इच्छति।
चन्द्रसेनः – यथाज्ञापयति माता। वयस्य, अस्ति अन्यः कश्चित् संदेशः ?
वञ्जुलः – कुमार, सक्तकृतस्नेहोऽयं जनः।
चन्द्रसेनः – नाद्यापि शिथिलः अस्माकं स्नेहबन्धः।
वञ्जुलः – तत् कथय, कुतोऽयं ते व्यामोहः ? विवृतद्वारं कुरु तव दुःखम्। तेन तत् सुसहयं भविष्यति।
चन्द्रसेनः – अभीप्सितमर्थमप्राप्य दुःखी भवति जन्तुः।
वञ्जुलः – कुमार, अलं विषादेन। पूर्वमेव प्रतिश्रुतं राजपदं कुमारस्य।
चन्द्रसेनः – वयस्य, इह न हि मधुलवलाभः, केवलं भवति धूलिधूसरं वदनम्।

(वेणुवादकाः वेणून् गृहीत्वा प्रविशन्ति।)

चन्द्रसेनः – (वेणुं गृहीत्वा) मञ्जुल, वेणुं वादयित्वा मम मनो विनोदयितु-मर्हसि।
मञ्जुलः – कुमार, अनधीतोऽहं वेणुवादने।
चन्द्रसेनः – मञ्जुल, प्रसीद। नार्हसि मे अभ्यर्थनां विहन्तुम्।
मञ्जुलः – परं न जानामि लेशतोऽपि वेणुं वादयितुम्।
चन्द्रसेनः – वयस्य, मिथ्याभाषणादपि सुकरं वेणुवादनम्। अङ्गुलीभिः रन्ध्राणि पिधाय मुखमारुतेन वेणुं पूरय। एवं कृते, वेणुः मधुरालापान् करिष्यति।
मञ्जुलः – कुमार, क्षमस्व। वेणुं धर्तुमपि न शक्नोमि, का कथा वादनस्य ?
चन्द्रसेनः – वञ्जुलमञ्जुलौ, इदं क्षुद्रं क्रीडनकं ध्वनयितुं नास्ति युवयोः सामर्थ्यम्। मां पुनः क्रीडनकं कृत्वा ध्वनयितुम् इच्छथः। मम हृदयनिहितं रहस्यम् उद्धर्तुं युवयोः प्रयत्नः। किं वेणुदण्डादपि क्षुद्रो मे मांसपिण्डः ? परच्छिद्रान्वेषणे कुशलोऽपि काकः न गरुडम् अतिक्रामति।

(ततः प्रविशति शालेयः।)

शालेयः – कुमार, अधुनैव त्वया साकं देवी मन्त्रयितुम् इच्छति।
चन्द्रसेनः – अमात्य, पश्य नभोऽङ्गणम्। अयं मेघः क्रमेलकसदृशः दृश्यते।
शालेयः – सत्यं क्रमेलकसदृशः। इयं हि तस्य ग्रीवा।
चन्द्रसेनः – नायं क्रमेलकसदृशः, किन्तु अयं गजसदृशः। नेयं तस्य ग्रीवा, किन्तु शुण्डादण्डः।

शालेयः – सत्यमाह भवान् । गजसदृशी अस्य आकृतिः ।

चन्द्रसेनः – न हि न हि । नायं गजः, नापि क्रमेलकः; अयं गर्दभसदृशः । नेयं ग्रीवा, नापि शुण्डादण्डः, किन्तु अयं लम्बमानः गर्दभस्य कर्णः ।

शालेयः – कुमार, एकाम् आकृतिम् उपमृद्य अन्यां कल्पयसि । मृत्पिण्डवत् मम बुद्धिरपि तत्तदाकारं गृह्णाति ।

चन्द्रसेनः – अत एव मृत्पिण्डबुद्धिर्भवान् । गच्छ । मात्रे निवेदय अचिरादेव आगच्छामि ।

शालेयः – यथाज्ञापयति कुमारः । (निष्क्रान्तः शालेयः ।)

वञ्जुलमञ्जुलौ – कुमार, अनुजानीहि आवां गमनाय ।

चन्द्रसेनः – भद्रौ, सुखं स्वपितम् । (निष्क्रान्तौ ।)

चन्द्रसेनः – घोरेयं तमिस्रा । श्मशाने भूतप्रेतपिशाचाः भीषणं रूपम् आदाय ताण्डवं कुर्वन्ति । अहो किमिदम् ? अहमपि भूतेन आविष्ट इव कवोष्णं मानवरुधिरं पातुमिच्छामि । यद् दृष्ट्वा भगवान् सहस्ररश्मिरपि नयनं निमीलयेत्, तादृशं घोरं कर्म आचरितुं स्फुरति मे बाहुः । अस्मिन्नेव कराले समये मात्रा आहूतोऽस्मि । तद् हृदय, स्थिरं भव । विवेकमाश्रय । मा नाम मातृघातको जामदग्न्यः मम शरीरम् आविशतु । वाग्वज्रेण मातरं विह्वलां करोमि, न पुनः शस्त्रेण तां प्रहरामि । (इति निष्क्रान्तः ।)

पञ्चमः प्रवेशः

(राजप्रासादे प्रक्षुब्धः संचरति राजा । वञ्जुलमञ्जुलौ तिष्ठतः ।)

राजा – (स्वगतम्) अहो, चन्द्रसेनं पुरतो द्रष्टुमपि नेच्छामि । प्रतिक्षणं वर्धते एव अस्य आततायिनः उद्दामः संरम्भः । तेन न केवलम् अस्माकं राजपदं, किन्तु जीवितमपि संशयमारोहति । वञ्जुलमञ्जुलौ, कुमारेण सह अङ्गदेशं गन्तुं सज्जौ भवतम् । अहमपि राजपत्रं मुद्राङ्कितं कृत्वा युष्मदधीनं करोमि ।

(ततः प्रविशति शालेयः ।)

शालेयः – देव, कुमारः अधुना एव मातरं द्रष्टुं प्रस्थितः । अहमपि जवनिकया

तिरोहितो भूत्वा तयोः संवादं श्रोष्यामि । सा खलु तं परुषाक्षरैः भर्त्सयित्वा भूतार्थं ज्ञास्यति । अहमपि तयोः संवादं श्रुत्वा भवन्तं विदितवृत्तान्तं करिष्यामि ।

राजा – साधु, शयनमन्दिरे त्वदागमनं प्रतीक्षमाणस्तिष्ठामि। (शालेयः निष्क्रान्तः।)

(स्वगतम्) अहो, जुगुप्सितं मे पातकम्। तस्य दुर्गन्धः पारिजात-गन्धमभिभूय स्वर्गवासिनो देवानपि उद्वेजयेत्। राज्यलोभेन भ्रातृवधम् आचरता मया महापातकादपि अधमतमं पातकं कृतम्। न पारयति निखिल-मपि गङ्गाजलं रुधिरप्रदिग्धमिमं हस्तं प्रक्षालयितुम्। करुणानिधे, पापिष्ठोऽपि अहं त्वां शरणमागतः। तत् किं नानुगृह्णासि मां दयार्द्रचेतसा ? हे सर्वसाक्षिन् त्रिलोचन किं काले एव अहम् अस्मात् पापाचरणात् न निवारितः? हे परमकारुणिक शम्भो उद्धर पतितं माम् अस्माद दुरितपङ्कात्। अथवा कथं नाम ईश्वरो मयि प्रसीदेत् ? सहोदरं निहत्य प्राप्तं राज्यं, महिषीं, किं वहुना भ्रष्टाचारेण अधिगतं सकलं विभवं भुञ्जानस्य नास्ति मनागपि मे अधिकारः क्षमां याचितुम्। पापकर्मणा अधिगतम् ऐश्वर्यमपि भोक्तव्यम्, दुरितक्षयोऽपि प्रार्थनीयः, इति विप्रतिषिद्धमेतत्। शक्यम् इह न्यायासने पापिनमपि निरपराधम् उद्घोषयितुम्, परं नैवं चित्रगुप्तः प्रतारयितुं शक्यते। न तत्र दम्भः, न वाक्छलं, न वा सुवर्णप्रयोगः प्रभवति। पापस्य परमाणुरपि चित्रगुप्ताद् अपलपितुं न शक्यते। प्रत्युत स्वापराधः स्वमुखेनैव कथनीयो भवति। किमतः कर्तव्यम् ? हे भ्रातृघातिन्, अतःपरं पश्चात्ताप एव ते शरणम्। स एव कदाचित् त्वाम् अस्माद् अनर्थात् मोचयिष्यति। भ्रातृघातकस्य नास्ति देहत्यागाद् ऋते अन्यत् प्रायश्चित्तं नाम। यथा यथा पातकादात्मानं मोचयितुं प्रयते, तथा तथा पातक-पाशेन दृढतरमेव निगडितो भवामि। विश्वेश्वर, मयि करुणां कुरु।

(इति भूमौ जानुनी निधाय प्रार्थयते। ततः प्रविशति चन्द्रसेनः।)

चन्द्रसेनः – अयं तातघातकः प्रार्थयमानस्तिष्ठति । तत् सत्वरमेनं गतप्राणं करोमि। ....परम् अलमनेन अविवेकेन। रणशिरसि हतस्य, प्रार्थनानिमग्नस्य वा मृत्युः स्वर्गाय भवति। येन नराधमेन मम पिता हतः, तमेव अहं स्वर्ग प्रापयामि। नायम् अपराधिनो दण्डः, किन्तु दुराचारस्य संमाननमेतत्। अनेन मम तातः एकपदे हतः। दुरितपरिहारार्थं प्रायश्चित्तं चरितुमपि तस्य अवसरो नासीत्। मृत्युसमये न तेन गङ्गोदकं पीतं, न वा ईशस्मरणं कृतम्। अहं

पुनः प्रार्थनानिमग्नमेनं हत्वा स्वर्गं प्रेषयामि। तस्माद् हे असिलते, मा एनं हिंसीः। प्रतीक्षस्व कंचित् कालम्। असिलते, तदैव तं हिंस्व यदा खलु अयं सुराप्रमत्तः, यदा वा कामान्धः जारकर्मणि रतः, अथवा यदा दुराचरणपङ्के आकण्ठं निमग्नः। तदानीमेव तस्य अन्तं कुरु, यदा हतः सः नरकं यास्यति। अहो, माता मां प्रतीक्षते। तद् गच्छामि।

(इति निष्क्रान्तः।)

राजा – (उत्थाय) अहो, सुचिरं प्रार्थये विश्वेश्वरम्। परं यावदिदं मनः पापकर्मणि रतं, तावत् किमनया प्रार्थनया ? न हि ईश्वरः भक्तिशून्यां प्रार्थनां शृणोति।

(निष्क्रान्तः।)

षष्ठः प्रवेशः

(ततः प्रविशति राज्ञी शालेयश्च।)

शालेयः – देवि, कुमारः भवतीं द्रष्टुम् इत एवाभिवर्तते। किं कारणम् अस्य हृद्रोगस्य, तद् देवी स्वयमेव चिकित्सितुमर्हति। परुषाक्षरैः भर्त्सयित्वा तं स्पष्टं कथयतु देवी, 'तव अविनयेन नितान्तं क्रुद्धः महाराजः। अतःपरं यदि एवम् आचरसि, न तत् मर्षयेत् उग्रदण्डो राजा। अतिभूमिं गताः खलु तव उन्मादलीलाः। क्षन्तव्यः मुग्धस्य कुमारस्य अपराधः, इति मया वारंवारम् अनुनीतः सः। नैवं पुनः अकार्यम् अनुतिष्ठ' इति। देवि, अहमपि अत्रैव यवनिकाभ्यन्तरे निभृतं तिष्ठामि।

(नेपथ्ये – अम्ब, अयि अम्ब।)

राज्ञी – अमात्य मा चिन्तां कुरु। पश्य अयमसौ आगच्छति। तदन्तर्धातुमर्हसि।

(निष्क्रान्तः शालेयः।)

चन्द्रसेनः – (प्रविश्य) अम्ब, किमर्थम् अहमाहूतः ?

राज्ञी – महदपराद्धं त्वया पितरि।

चन्द्रसेनः – महदपराद्धं त्वया मम पितरि।

राज्ञी – असंवद्धं ते प्रतिवचनम्।
चन्द्रसेनः – अशिष्टं ते दोषारोपणम्।
राज्ञी – कुमार,
चन्द्रसेनः – परं कथय, किमर्थम् अहमाहूतः ?
राज्ञी – किम् अभिजानासि माम् ?
चन्द्रसेनः – कथं नाभिजानामि ? त्वं हि खलु दुर्गदेशस्य सम्राज्ञी, हते भर्तरि देवरस्य प्राणप्रिया, दौर्भाग्यवशात् मे जननी।
राज्ञी – अविनीत, मातरमपि अवजानासि। तिष्ठ, तमेव प्रेषयामि, यस्त्वां समुचितैः शब्दैः बोधयेत्।

(गन्तुम् उद्यता।)

चन्द्रसेनः – एहि, अत्रैव उपविश। मा इतो गच्छ। पश्य आदर्शे प्रतिबिम्बितं तव पापिष्ठम् अन्तरङ्गम्।

(मातरं मणिबन्धे गृहीत्वा बलात् समुपवेशयति।)

राज्ञी – अरे, किं कर्तुमुद्यतोऽसि ? किं मां हन्तुमिच्छसि ? भो भो रक्षकाः, परित्रायध्वं परित्रायध्वम्।

(यवनिकाभ्यन्तरे – **शालेयः** – भो भो राजपुरुषाः, उन्मत्तश्चन्द्रसेनः मातरं निहन्ति। परित्रायध्वम्। परित्रायध्वम्।)

चन्द्रसेनः – रे रे अपसर्प कृष्णसर्प, निभृतं दशसि ? एष हतोऽसि।

(खड्गेन प्रहरति।)

शालेयः – हा हतोऽस्मि। (पतति।)
राज्ञी – हा धिक्, हा धिक्। आततायिन्, किमिदमाचरितम् ?
चन्द्रसेनः – न जाने। किमेष राजा हतः ?
राज्ञी – रे दुष्ट, किमिदम् अनार्यम् आचरितम् ?
चन्द्रसेनः – अनार्यम् ? ....अथवा अनार्यमेव। राजानं हत्वा तस्य अनुजेन शय्यासंगतमिव अनार्यम्।
राज्ञी – किं राजानं हत्वा ?
चन्द्रसेनः – भद्रे, किमन्यत् ?.... (मृतं शालेयम् उद्दिश्य) रे रे कपटपटो, दुष्टवटुक, अयं ते अपश्चिमः प्रणामः। मया चिन्तितं, तव स्वामी एव अत्र

तिष्ठति । अथवा, इदमेव ते भागधेयम् । अव्यापारेषु व्यापारः परिणामे भयंकरः, इति अयमेव सारः तव जीवनस्य ।....मातः, अलं शून्यदृशा विलोक्य । एहि, उपविश । कथं पाषाणनिष्ठुरं तव हृदयं, तद् दर्शयामि । परं सर्वेषाम् अविनयानाम् आयतनं ते हृदयम् । न तत्र मम वचांसि अवकाशं लभेरन् ।

राज्ञी – परं किं नु मया कृतम्, यदर्थम् ईदृशैः परुषाक्षरैः मां भर्त्सयसे ?

चन्द्रसेनः – किं कृतम् ? यत् त्वया कृतं, तेन पतिव्रतानां शीलमपि कलङ्कितं भवेत्, पातिव्रत्यं मिथ्याचारो भवेत् । तव व्यभिचारेण कुलस्त्रीणां विनयः गणिकानाम् अभिनयो भवेत् । विवाहकाले कृतानि शपथवचनानि द्यूतकराणां प्रमत्तप्रलपितानि स्युः । समग्रो विवाहविधिः निरर्थकः शब्दराशिः भवेत् । द्यौरपि व्रीडिता भवेत्, भूश्च प्रलयवेदनया कम्पिता भवेत् ।

राज्ञी – न जाने किमर्थम् अयं वज्रनिर्घोषः ।

चन्द्रसेनः – पश्य इमां प्रतिमाम्, इमां च अन्याम्; भ्रातृद्वयस्य प्रतिमाद्वयम् । पश्य. कथं प्रकाशते अस्य मुखचन्द्रः ? मनीषिणां माननीयः, कोऽपि दिव्यः पुरुषः, सौन्दर्ये मनसिजः, पराक्रमे परशुरामः, प्रजानुरञ्जने राघवः, राजनीतौ श्रीकृष्णः, कार्तवीर्य इवाजानुबाहुः, महेन्द्र इव व्यूढोरस्कः । किं बहुना ? सर्वदेवतानां गुणसारं गृहीत्वा विधिना कल्पितं पुरुषरत्नम् इदम् । अयं ते दयितः आसीत् । अधुना इमं नूतनं भर्तारं पश्य । अयं क्रमेलक इव विषमगतिः, राहुरिव राजसूर्यं ग्रसमानः, उलूक इव अभद्रदर्शनः । अपि चक्षुष्मती त्वम्, उत जन्मान्धा ? पुरा परमेष्ठिनः निधानभूतं रत्नाकरम् आलोड्य, अधुना पङ्किले पल्वले निमज्जमाना कीदृशं सुखम् अनुभवसि ? मनसिजं त्यक्त्वा मर्कटम् आलिङ्गसि । तदपि अस्मिन् गलिते वयसि ? यदा खलु वीतरागाः वानप्रस्थम् आश्रयन्ते । विलयं गतस्ते सदसद्विवेकः, विषयवासना पुनः अवशिष्टा । अन्यथा कामविकारा अपि न प्रादुर्भवेयुः । विवेकविकला हि वासना मनुजमपि पशुकोटिं नयति । मदमूढोऽपि जनः पापपुण्ययोः, शुभाशुभयोः, तारतम्यबुद्धिं न जहाति । केन खलु यातुधानेन ग्रसित्वा त्वं मदान्धा कृता ? तव ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च कथं बधिरतां गतानि ? लज्जे, क्व गतस्ते विनयः ? हे पुष्पधन्वन्, अगाधस्ते महिमा । तव कुसुमसायकैः हतानां जरतीनामपि ईदृशः चित्तसंक्षोभः, का पुनः कथा नवयौवने कृतपदानां मुग्धतरुणीनाम् ?

राज्ञी – चन्द्रसेन, विरम विरम। अनेन अञ्जनेन विमलं मे चक्षुः। अपगतं कल्मषं बुद्धेः। मम शीलस्य कृष्णकलङ्कं सप्तसिन्धवोऽपि प्रमाष्टुं न क्षमाः।

चन्द्रसेनः – परं तं नरकमेव स्वर्गं मत्वा, कृमिकीटका गोमय इव कामपङ्के यथेच्छम् अवगाहसे। धिक् त्वाम्, धिक् त्वाम्।

राज्ञी – कुमार, अलमनेन वाक्ताडनेन। इमे परुषाः शब्दाः शङ्कुरिव मम हृदयं विध्यन्ति।

चन्द्रसेनः – अयं खलु दुर्वृत्तः, नीचाधमः, राजघातकः, तव पुण्यश्लोकस्य पूर्वभर्तुः षोडशीं कलामपि नार्हति। रे कुलकलङ्क, तस्कर, मम पितुः रत्नखचितं सिंहासनं प्राणांश्च अपहृत्य किं साधितं त्वया?

राज्ञी – कुमार, नातःपरं.......

(ततः प्रविशति पिशाचः।)

चन्द्रसेनः – भो भो यक्षगन्धर्वकिन्नराः, परित्रायध्वम्, परित्रायध्वम्। प्रसीदत दीने मयि। अयि तात, किमर्थं ते सहसावतारः?

राज्ञी – अहो, उन्मत्तोऽयम्।

चन्द्रसेनः – रे नक्तंचर, कच्चित् मां स्मारयितुं समागतः? अयं तव अलसः पुत्रः अचिरनिर्वर्तनीयमपि तव आदेशम् उपेक्षमाणस्तिष्ठति।

पिशाचः – मां मा विस्मर। शान्तं तव वैराग्निम् उद्दीपयितुमेव समागतोऽस्मि। परं शृणु। भयसंत्रस्ता तव जननी। समाश्वासय ताम्। कुसुमकोमलं हि अबलानां मनः, स्वल्पेनापि दुःखेन संक्षुब्धं भवति। तदेनां सान्त्वयितुमर्हसि।

चन्द्रसेनः – अम्ब, समाश्वसिहि, समाश्वसिहि।

राज्ञी – वत्स, अपि स्वस्थं ते चित्तम्? किं शून्यया दृशा पश्यसि? आकाशे दृष्टिं निधाय भयव्याकुलः केन सह संभाषसे? क्षुब्धे तव लोचने। रोमाञ्चितं शरीरम्। इममावेगं निरुध्य धीरो भव। समाहितो भव। किं नु खलु प्रेक्षसे?

चन्द्रसेनः – तमेव पश्यामि। त्वमपि पश्य, असहायोऽयं दृश्यते। अस्य दीनमुद्रामवलोक्य ग्रावाऽपि सचेतनो भूत्वा अश्रुमोचनं कुर्यात्। रे पिशाच, अलं निरीक्ष्य। अन्यथा तव दीनरूपं दृष्ट्वा मम निश्चयः विचलेत्। रिपुवधस्य धीरगम्भीरां प्रतिज्ञां विस्मृत्य दुःखेन अश्रुपातं करिष्यामि, न कोपेन रुधिरपातम्।

राज्ञी – अरे, केन सह संभाषसे ?

चन्द्रसेनः – न कश्चित् ते दृष्टिपथमागतः ?

राज्ञी – न कोऽपि ।

चन्द्रसेनः – न किंचित् ते श्रुतिपथम् आगतम् ?

राज्ञी – न किंचिदपि । वत्स, आवां विहाय न कोऽपि अत्र तिष्ठति । न कोऽपि भाषते ।

चन्द्रसेनः – पश्य अत्र संचरन्तं तातसदृशं पुरुषम् । कथमयं शनैः शनैः तिरोधानं गच्छति ।

राज्ञी–वत्स, अयं ते मतिभ्रमः । असंभवं खलु अशरीरस्य संचरणम् ।

चन्द्रसेनः – नायं मतिभ्रमः, अम्ब, नायं मतिभ्रमः । पश्य मम नाडीम् । अविकृता नियतकालं परिस्पन्दते । न मे वचनम् उन्मत्तजल्पितम् । परीक्षस्व माम् । उक्तपूर्वम् अशेषम् अक्षरशः पदशः अनुवदामि । निरागसं त्वां मतिभ्रमेण अधिक्षिपामि, इति मा अवमन्यस्व । तव अनार्यचरितमेव माम् एवं वक्तुं प्रेरयति, न पुनः मम मतिभ्रमः । अप्रतिकृतो व्याधिः समग्रं शरीरं ग्रसते । अतः निवेदय स्वकृतं पापं सर्वसाक्षिणे विश्वेश्वराय । पश्चात्तापेन दग्धहृदया दुरितक्षयार्थं त्र्यम्बकं प्रार्थयस्व । अवशिष्टे आयुषि संयमं कृत्वा परिहर पापाचरणम् । क्षमस्व माम् । परमस्मिन् कराले कलिकाले धर्मेण अधर्मः शरणीकर्तव्यः, सत्येन अनृतं शरणीकर्तव्यम् ।

राज्ञी–वत्स, मम हृदयं त्वया द्विधा कृतम् ।

चन्द्रसेनः – तदेवं कुरु । पापमर्धं परित्यज्य पुण्येन अर्धेन जीवनयात्रां निर्वाहय । स्वस्ति ते । परं मा प्रविश तस्य अधमस्य शयनमन्दिरम् । यद्यपि पतिता, सतीवद् वर्तस्व । दुःसाध्यमपि एतत् अभ्यासेन वैराग्येण च सुशकं भवेत् । अद्य रात्रौ आत्मानं नियमय । एवम् इन्द्रियाणि विषयेभ्यो निगृह्य शान्तिमवाप्स्यसि । यदि सत्यमेव त्वं मम माता, तर्हि सततं तातचरणयोः ध्यानपरा भव । प्रायश्चित्तेन परिपूतायास्तव चरणयोः पतिष्यामि पुत्रधर्मम् अनुसृत्य ।....(शालेयम् अवलोक्य) व्यथते मे मनः इमं वराकं द्रष्टुम् । मां निमित्तमात्रं कृत्वा अव्यापारेषु व्यापारं विदधत् अयं पिशुनहतकः कृतान्तेनैव दण्डितः । मन्दिरान्तरं नीत्वा निगूहामि अस्य कलेवरम् ।

अजानता मया हतोऽयं कीलोत्पाटी वानरः। मयैव हतः अमात्यहतकः, इति नैतद् अपलपितुम् इच्छामि। अथवा हतविधिविलसितमेतद्। अयम् अशुभकर्मणां प्रारम्भः। न जाने किमग्रे भविष्यति। अम्ब, अनुकम्पामृदुरपि श्रोत्रियः यज्ञपशुं मारयत्येव। करुणेनापि मया क्रौर्यमवलम्बनीयम्, इति विधिलिखितम्। देवि, अस्ति अन्यदपि किंचद् वक्तव्यम्।

राज्ञी – किं तत् ?

चन्द्रसेनः – यदेतावता मया उक्तं, तत् सर्वं विस्मर्तव्यम्। अस्थाने कृतोऽयम् उपदेशः। तुन्दिलतनुः स भुजङ्गः त्वां कामार्तां कृत्वा शयने विलोभयेत्। विविधाभिः प्रणयलीलाभिः त्वां स्वाधीनां कुर्यात्। अङ्गुलीभिः तव कपोल-युगं परामृशेत्। प्रिये, प्राणेश्वरि, इत्यादिचाटुशतैः तव अधरं पिबेत्। रुधिरप्रदिग्धैः कराग्रैः त्वां कण्ठलग्नां कुर्यात्। करपाशनिविष्टा त्वम् आ मूलात् सर्वं प्रकाशयिष्यसि, 'व्याजकृतः चन्द्रसेनस्य उन्मादः, न वास्तविकः,' अथवा युक्तमेव पतिनिष्ठया त्वया सर्वं प्रकाशयितुम्। त्वं हि तस्य गृहिणी, नीतिनिपुणा हृदयसम्राज्ञी। अशक्यं ते इमं वृत्तान्तम् अपलपितुं तस्माद् राजपुङ्गवात्।

राज्ञी – विश्रब्धो भव। पांशुलाऽपि जननी न पुत्रवात्सल्यं जहाति। समाहितो भव। प्राणैरपि परिरक्षामि इदं रहस्यम्।

चन्द्रसेनः – आदिष्टोऽस्मि अङ्गदेशं गन्तुम्। अपि जानासि ?

राज्ञी – हन्त, विस्मृतं खलु मया एतन् निवेदयितुम्। निर्णीतपूर्वोऽयं विषयः।

चन्द्रसेनः – सज्जानि राजमुद्रितानि पत्राणि। आदिष्टौ वञ्जुलमञ्जुलौ मार्गं दर्शयितुम्। यथादेशं मया अनुसर्तव्यौ इमौ जाल्मौ। मां गर्ते निक्षेप्तुं कपट-कूटं विरचितं खलु। परं तस्मिन् गर्ते तावेव निपातयामि। शठे शाठ्यं समाचरेत्, इति हि राजनीतिः। इतो नयामि अस्य कलेवरम्। अयं वाचाटः कितवः अधुना शान्तो भूत्वा मौनं भजते। एहि भद्र, एवंविधस्ते अन्तः। अम्ब, स्वस्ति ते।(इति निष्क्रान्तः।)

सप्तमः प्रवेशः

(राज्ञ्याः शयनमन्दिरम् । राजा, राज्ञी, वञ्जुलमञ्जुलौ च ।)

राजा – वसुमति, कुतः इमानि उच्छ्वसितानि ? किमर्थम् अश्रुपर्याकुलं ते मुखम् ? कथय सर्वं वृत्तान्तम् । क्व ते पुत्रः ?

राज्ञी – वञ्जुलमञ्जुलौ, आर्यपुत्रेण साकं रहसि मन्त्रयितुम् इच्छामि। तदितो गम्यताम् । आर्यपुत्र, अहो अत्याहितम् । भीषणं खलु संवृत्तमद्य ।

राजा – देवि, कथमिव ? अपि कुशलं कुमारस्य ?

राज्ञी – प्रभञ्जनेन सागर इव नितराम् उन्मत्तोऽभूत् कुमारः । अत्रान्तरे जवनिकातः शब्दं श्रुत्वा कोशात् खड्गम् उद्धृतवान्। रे रे अपसर्प कृष्णसर्प इति उच्चैः आक्रुश्य उन्मत्तः कुमारः अस्माकं वृद्धममात्यं सपद्येव व्यापादयामास ।

राजा – अहो, भीषणेयं ब्रह्महत्या । दिष्ट्या अहं तत्र असंनिहितः । अन्यथा ममापि सैव गतिरभविष्यत् । प्रमत्तस्य तस्य उद्दामः संचारः सर्वेषामेव विनाशाय कल्पेत । स्वामिभक्तस्य अमात्यस्य वधः कथम् उपेक्षणीयः ? कथं वा प्रजाः समाश्वासनीयाः ? राज्ञैव हतः अमात्यः, इति जनापवादः सर्वत्र प्रसरेत् । अहो, अदूरदर्शित्वम् अस्माकम् । कुतोऽयम् उन्मत्तः मया पूर्वमेव न निगृहीतः ? वसुमति, सुतवात्सल्येन विलुप्तः अस्माकं कार्याकार्यविवेकः । निगूढो व्याधिरिव अस्य अप्रतिकृतः उन्मादः परिणामे भयंकरः स्यात् । क्वाऽसौ गतः ?

राज्ञी – अमात्यकलेवरस्य विनियोगं कर्तुं गतः। मोहान्धो भूत्वा प्रथमं शालेयं निषूदितवान्, अनन्तरं पश्चात्तापदग्धः दीनमार्तं च विलपति स्म । यदा उन्मादं गतः, तदा वज्रादपि कठोरः, परं यदा प्रकृतिमापन्नः, तदा कुसुमादपि कोमलः ।

राज्ञी – वसुमति, एवं मया निश्चितम्, सूर्योदयात् प्रागेव नावमारोप्य अङ्गदेशं प्रेषणीयः कुमारः । राजाधिकारम् उपयुज्य इदम् अमात्यवृत्तं प्रजाभ्यः संरक्षणीयम् । अयि भोः वञ्जुलमञ्जुलौ,

(ततः प्रविशतः वञ्जुलमञ्जुलौ ।)

सावधानं शृणुतम् । उन्मत्तेन चन्द्रसेनेन निहतः वृद्धसचिवः । तस्य कलेवरम

आदाय न जाने क्व गतश्चन्द्रसेनः। तदन्विष्य आनयतं कुमारम् अमात्यकलेवरं च मत्पुरतः। शीघ्रं गच्छतम्। माऽस्तु विलम्बः। (उभौ निष्क्रान्तौ।) प्रिये वसुमति, वयमपि मन्त्रिपरिषदम् आहूय इदं दुर्वृत्तं निवेदयामः। अस्यामापदि किं कर्तव्यम्, इति तत्रैव विचारयामः। नो चेत्, अमात्यवधस्य अपवादः अस्माकं यशः मलिनयेत्। विषण्णोऽस्मि अनेन वृत्तान्तेन। वसुमति, त्वमपि श्रान्ताऽसि। तदितो गत्वा विश्रमितुमर्हसि। अहमपि चन्द्रसेनं दृष्ट्वा अनुपदम् आगच्छामि। (निष्क्रान्ता राज्ञी।)

राजा – (पठति।)

स्वस्ति। श्रीसकलगुणालङ्कृत – राजाधिराज – अङ्गराजाय स्नेहपुरस्सरं निवेदयति – उभयदेशयोः चिरप्ररूढं सख्यं स्मृत्वा अधस्तनं कार्यम् अचिरेणैव संपादनीयम्। पठितमात्रे अस्मिन् पत्रे, अस्माकं भ्रातृव्यः चन्द्रसेनः सपद्येव व्यापादनीयः। अयं राहुः सततं मां पीडयति। यावदयं जीवति, तावत् न मे मनसः शान्तिः, न वा सुखस्वापः। अतः इदमनन्यसाध्यं कर्म भवतैव निर्वर्तनीयम्। कार्यसिद्धिं श्रोतुं समुत्सुकः, भवतः प्रियवयस्यः, ––चण्डवर्मा।

(ततः प्रविशतः वञ्जुलमञ्जुलौ।)

राज्ञी – किम् अधिगतं कलेवरम् ?

वञ्जुलः – देव, अनुनीतोऽपि कुमारः न निवेदयति कुत्र निहितं कलेवरम्।

राजा – कुत्र वर्तते चन्द्रसेनः ?

वञ्जुलः – बहिस्तिष्ठति।

राजा –(विचिन्त्य) तं सत्वरं प्रवेशय। (वञ्जुलो गत्वा चन्द्रसेनं प्रवेशयति।)

राजा – चन्द्रसेन, कुत्र वर्तते अमात्यः ?

चन्द्रसेनः – भोजने व्यापृतः।

राजा – किं भोजने ?

चन्द्रसेनः – भोजने एव। नासौ स्वयं भुङ्क्ते, परम् अन्येन भुज्यते। राजनीतिकुशलानां कृमिकीटकानां परिषद् अस्मिन्नेव महाकार्ये व्यापृता। देव, जीवो जीवस्य जीवनम्। अजकुक्कुटं भक्षयित्वा मानवः आत्मानं पोषयति, मानवं भक्षयित्वा कृमिकीटकाः आत्मानं पोषयन्ति। तुन्दिलं राजानं कृशं च भिक्षुकं कालः सममेव कवलीकरोति।

राजा – हन्त भोः, महत् कष्टमापतितम्।

चन्द्रसेनः – कृमिकीटकाः राजरुधिरं पिवन्ति, मत्स्याः कृमिकीटकान् भक्षयन्ति, वयं तं मत्स्यं भक्षयामः, एवं वयं राजरुधिरं पिवामः।

राजा – चन्द्रसेन, केन अभिप्रायेण भाषसे ?

चन्द्रसेनः – याचकोऽपि राजाधिराजं कवलीकरोति, इति मम अभिप्रायः।

राजा – चन्द्रसेन, कुत्र वर्तते शालेयः ?

चन्द्रसेनः – स्वर्लोकं गतः। तमन्वेष्टुं सेवकान् तत्रैव प्रेषय। यदि तत्र न दृष्टः, तर्हि नरकं गत्वा स्वयमेव मृगयस्व। यदि च मासाभ्यन्तरे तं न अधिगच्छसि, तदानीं दक्षिणेन मम मन्दिरं पूतिगन्धमवघ्राय शालेयमुपलप्स्यसे।

राजा – सेवकाः, गत्वा शालेयं तत्र अन्विष्यत। (निष्क्रान्ताः सेवकाः।)

चन्द्रसेनः – स खलु भवन्तमेव प्रतीक्षते।

राजा – चन्द्रसेन, अनेन तव दुश्चरितेन वयं सर्वे दिङ्मूढाः। त्वया शालेयो हतः, इति वार्ता सर्वत्र प्रसरेत्। प्रजानां कोपानलात् कथं त्वं परिरक्षणीयः इति महती अस्माकं चिन्ता। अतः अस्मिन्नेव क्षणे अङ्गदेशं गन्तुं सिद्धो भव। त्वां परिरक्षितुम् अयमेव उपायः। सज्जा ते नौका। अनुकूलो वातः। तत् त्वरस्व।

चन्द्रसेनः – किम् अङ्गदेशम् ?

राजा – बाढम्।

चन्द्रसेनः – शोभनः उपायः। मातः, आमन्त्रये त्वाम्।

राजा – तात इति वक्तव्ये, मातः इति किमर्थं मां संबोधयसि ?

चन्द्रसेनः – मातः, मातापितरौ नाम अर्धनारीनटेश्वरौ। अतः मातृवन्दनेन पिताऽपि वन्दितो भवति। अङ्गदेशं गन्तुं सज्जोऽस्मि। (निष्क्रान्तः।)

राजा – वञ्जुलमञ्जुलौ, इदं राजमुद्रितं पत्रम्। तत् कालक्षेपम् अपास्य प्रतिष्ठध्वम्।

वञ्जुलमञ्जुलौ – यदाज्ञापयति देवः। (निष्क्रान्तौ।)

राजा – हन्त, लब्धमिदानीं स्वास्थ्यम्। इमं कण्टकमुद्धृत्य अचिरादेव वीतचिन्तो भविष्यामि।

इति द्वितीयोऽङ्कः।

तृतीयोऽङ्कः

प्रथमः प्रवेशः

(राज्ञीमन्दिरम्। राज्ञी, हर्षनादः, सभ्याश्च ।)

हर्षनादः – देवि, मल्लिका त्वां द्रष्टुमागता ।

राज्ञी – नोत्सहे तां द्रष्टुम् ।

हर्षनादः – अदृष्ट्वा देवीं न प्रतिगच्छामि, इति सा पुनः पुनः वदति । पितरं संबोध्य वदति, ' जगदिदं नाम कितवानामायतनम् ' इति । सोरस्ताडं रोदिति । पथि दृष्टं पुष्पमपि पादेन ताडयति । असंबद्धं प्रलपति । तद् दर्शनेन अनुग्राह्या इयम् ।

राज्ञी – तेन प्रवेशय एनाम् । (निष्क्रान्तः हर्षनादः ।) अहो विपरीतान्येव निमित्तानि पश्यामि । स्पन्दते मे दक्षिणनेत्रम् । प्रातः उलूकं दृष्ट्वैव अभद्रम् आशङ्कितं मया । या मम वत्सस्य जीवितम्....

मल्लिका – (प्रविश्य) निमीलितम् । निमीलितं तातस्य प्राणज्योतिः ।

राज्ञी – मल्लिके, कराले प्रदोषे किमभद्रं मन्त्रयसे ?

मल्लिका – भद्रे, अपि जानासि, क्व वर्तते दुर्गदेशस्य रूपवती सम्राज्ञी ?

राज्ञी – मल्लिके, किमसंबद्धं प्रलपसि ?

मल्लिका – **जाने नाहं लोकविचित्रम् ।**

रसिकसुन्दरं भुजङ्गमं ते ।
तिर्यङ्मुकुटो यष्टिः कुटिला ।
लोहितवर्णे मुखरपादुके ॥

राज्ञी – मल्लिके, कोऽर्थस्तव गीतस्य ?

मल्लिका – किं पृच्छसि ? अवधारय ।

गतो वराको मृतो वराकः ।
भस्मीभूतो यातो लोपम् ।
नाहं जाने पुनर्दर्शनम् ।
कदा भवेन्मे भुवि वा दिवि वा ॥

राज्ञी – मल्लिके, किमेतत् ?

मल्लिका – देवि, शृणु।

तुहिनगिरिविशुद्धं प्रेतवस्त्रं तदीयम्

(ततः प्रविशति राजा।)

राज्ञी – देव, पश्य इदं दैन्यं मम वत्सायाः।

मल्लिका – **विविधमधुरपुष्पैः शोभमानं समन्तात्।**

शवमनुगतमासीद् बन्धुभिः साश्रुनेत्रम्

नरपतिहितकारिन्, कीदृशस्ते विपाकः॥

राजा – अद्यापि पितुः स्मरति।

मल्लिका – राजन्, सर्वसाक्षी भगवान् उचितेन कर्मफलेन संमानयति प्राणिनम्। इह पुनः अन्यस्य अपराधः, अन्यस्य शासनम्। पयो दृष्ट्वा निमीलितनयनो मार्जारः लगुडम् उपेक्षते।

राजा – वत्से, किमर्थम् अस्मान् उपालभसे ?

मल्लिका – राजन्, सुखं च ते शयनं च ते। यावज्जीवेत् सुखं जीवेत्। पतिनिधने रोदिति, जारस्य कण्ठ पतति। स्त्रियश्चरित्रं पुरुषस्य भाग्यम्। देवि, इमानि मधुरगन्धीनि केतकीदलानि। परं गन्धलुब्धः कृष्णसर्पः तेषां गन्धमाघ्राय गरलम् उद्वमति। अयं ते विषमयः संसारः।

राज्ञी – देव, दुःसहानि अस्याः शोकभाषितानि।

मल्लिका – काममोहितं क्रौञ्चमिथुनं वियोज्य निषादः अप्रतिष्ठां गतः। सुभग, श्वः मदनोत्सवः। सुस्नाता, [सुवासाः गवाक्षे स्थित्वा प्राणवल्लभं प्रतीक्षेय। मम मन्दिरं संप्राप्तस्य तव मङ्गलदीपेन स्वागतं करिष्यामि। त्वमपि बाहुपाशेन आलिङ्ग्य शयनमुपनीय मां सनाथां करिष्यसि। हे मदनोत्सव, भूयोऽपि त्वां निमन्त्रये।

राजा – अहह कष्टम्। कियच्चिरम् इयमेवं मन्त्रयिष्यति ?

मल्लिका – शृणु।

मीरा कृष्णं पतिं वृणीते॥

सीमन्ते सिन्दूरं कुरुते।

पतिनिन्दां जननिन्दां लभते।

बन्धुजातिभिर्विमानितेयम् ।
अविषह्यं निजदुःखं त्यक्तुम् ।
अन्ते गरलं शरणं कुरुते ।
मीरा कृष्णं पतिं वृणीते ॥

राज्ञी – मल्लिके, शान्तं पापम् । शान्तं पापम् । धीरा भव ।

मल्लिका – देवि, सर्वं खलु शुभं भविष्यति । धैर्यम् अवलम्बस्व । परं न शक्नोमि अश्रूणि नियन्तुम् । स किल मन्त्रसंस्कारं विना चितामारोप्य भस्मसात्कृतः । मम भ्राता सर्वमेतत् नूनं ज्ञास्यति । अनुगृहीताऽस्मि भवताम् उपदेशेन साहाय्येन च । 'त्वं जीवितं त्वमसि मे हृदयं द्वितीयम्' इति प्रियशतैः विलोभ्य, नैतद् उचितं सहसा परित्यक्तुम् ।

चाटुसहस्रैर्मधुरालापैर्विमोहिता सा बाला ।
समयपूर्वकं प्रतार्य मुग्धा दुःखसागरे निपातिता ॥
लीला तरुणानां नूनं प्राणहरा स्त्रीणाम् ॥

वसुमति, इदं तव गङ्गोदकम् । राजन्, इदं तव तिलोदकम् । एतद्धि देवताः प्रीणाति । (इति निष्क्रान्ता ।)

राजा – हर्षनाद, अनुसर एनाम् । अवहितो भूत्वा तां परिपालय ।

हर्षनादः – यथाह देवः । (निष्क्रान्तः हर्षनादः ।)

राजा – पितृशोकेन व्यथितमस्या हृदयम् । वसुमति, सस्ये शलभा इव विपदः सममेव समापतन्ति । प्रथमं तावत्, अस्याः पिता हतः, तदनु चन्द्रसेनो विदेशं गतः । अमात्यस्य गूढनिधनेन शङ्काकुलाः प्रजाः । तस्य निभृतम् और्ध्वदेहिकं कृत्वा मयाऽपि अपराद्धं लोकस्य । शोकेन प्रियविरहेण बलवदुन्मत्ता मल्लिका, अर्थविधुराणि गीतानि गायन्ती परिभ्रमति । पितृवधस्य कौलीनं श्रुत्वा ललाटः काम्पिल्यनगरात् निभृतं प्रत्यागतः । न जाने किं भविष्यति । सर्वथा समुपस्थितः राजकुलविनिपातः । नृपाङ्गणगताः खलाः ललाटस्य कर्णं दष्ट्वा अमात्यघातको राजा, इति मां दूषयेयुः । (नेपथ्ये कोलाहलः । **ललाटः** – न मां प्रतिरोद्धुम् अर्हसि । राजानं द्रष्टुमिच्छामि ।)

राज्ञी – आर्यपुत्र, कोऽयं कोलाहलः ?

राजा – कः कोऽत्र भोः ? (ततः प्रविशति द्वारपालः ।)

राजा – किमर्थम् अयं कलकलः ?

द्वारपालः – अवहितो भूत्वा देवः आत्मानं रक्षतु। प्रक्षुब्धः सागर इव क्रोधारुणनेत्रः ललाटः सैनिकैः सह द्वन्द्वं कुरुते। 'कुत्र वर्तते राजा ? कुत्र वर्तते स नीचापसदः अमात्यघातकः ?' इति वारंवारम् आक्रोशति।

(नेपथ्ये पुनः कोलाहलः।)

राजा – अहो, भग्नं तावत् महाद्वारम्।

(ततः प्रविशति सायुधो ललाटः सैनिकैः सह।)

ललाट : – कुत्र वर्तते राजा ? भद्रमुखाः, यूयं बहिस्तिष्ठत।

अनुयायिनः – मैवम्। वयमपि अभ्यन्तरं प्रविशामः।

ललाटः – प्रसीदत सहायाः, अहमेकाकी प्रविशामि। यूयमत्रैव मां प्रतिपालयत।

अनुयायिनः – यदाह अमात्यपुत्रः।

ललाटः – राजन्, प्रत्यर्पय मे पितरम्।

राजा – ललाट, शान्तो भव। समाहितो भव।

ललाटः – किमहं पुंश्चलीपुत्रः, उत पिता मे जारिणीपतिः, येन मां शान्तिमुपदिशसि ?

राजा – ललाट, अस्थाने ते क्रोधः। वसुमति, अलमेनं प्रतिरुध्य। देवरक्षितं हि राजशरीरम्। न कोऽपि तत् प्रहर्तुम् ईष्टे। न भेतव्यम्, न भेतव्यम्। भद्र, विश्रब्धं भाषस्व। किमेवं ज्वलसि ?

ललाटः – क्व मे पिता ?

राजा – हतः।

राज्ञी – परं नासौ आर्यपुत्रेण हतः।

राजा – वसुमति, माऽस्तु ते अन्तरायः। ललाट, यत् प्रष्टव्यं, तत् सर्वं पृच्छ।

ललाटः – कथं स हतः ? नाहं मधुरवचनैः विप्रलब्धुं शक्यः। येन मम तातो हतः, तं सपद्येव दण्डयितुं संनद्धः। नात्र राजनिष्ठां गणयामि, न वा कुलशीलं विचारयामि, नापि लोकापवादं मानयामि। कामं मां वधस्तम्भम् आरोपयन्तु, कामं वा ज्वलदनले प्रक्षिपन्तु; परम् अहत्वा तातघातकं, नास्ति मे मनागपि शान्तिः।

राजा – कामं दण्डय पितृघातकम्। कस्त्वां निवारयति ?

ललाटः – न कोऽपि। परम् अज्ञात्वा पितृघातकं, नोत्सहे शस्त्रमुद्धर्तुम्।

राजा – ललाट, उद्दामस्ते क्रोधाग्निः। तातस्य शत्रुमिव मित्रमपि कदाचिद् भस्मसात् करिष्यसि।

ललाटः – वैरिणमेव हन्तुमिच्छामि। तातनिर्विशेषा मे तातवयस्याः। प्राणैरपि तान् परिपालयामि। तत् कथय, केन हतो मे तातः?

राजा – दिष्टया अमात्यपुत्रः शोभसे। पितुस्ते वधस्य पातकं मां दूरतोऽपि न स्पृशति; प्रत्युत राजनिष्ठस्य अमात्यस्य निधनेन नक्तंदिवं दहति मां शोकाग्निः। एतस्य प्रत्ययम् अचिरादेव अनुभविष्यसि।

(नेपथ्ये कलकलः। अपसरत, अपसरत मार्गात्। प्रवेश्यताम् इयम् अभ्यन्तरम्।)

ललाटः – देव, कोऽयं कोलाहलः? (ततः प्रविशति मल्लिका।)

मल्लिका – **सपदि विगतसंज्ञं नीतवन्तः श्मशानम्**
मलयगिरिजकाष्ठैः कल्पिता तस्य शय्या।
नरपतिहितकर्ता कार्यकाले हतस्त्वम्
अनुभव चिरनिद्रां माऽस्तु निद्राविघातः॥

अहो, विस्मृतम्। अद्य सार्वपित्री अमावास्या। अचिरादेव तातः भोजनार्थम् आगमिष्यति। प्रथमं तावत् पाकं साधयामि। तस्य प्रियं मुद्गौदनं पायसं च कल्पयामि। हे तात, कथमतःपरं ते दर्शनम्?

ललाटः – मल्लिके, भ्रातृवत्सले, तव परिदेवनं श्रुत्वा न शक्नोमि क्षणमपि प्राणान् धारयितुम्। तव विक्लवां दशां दृष्ट्वा शुष्यति मम शरीरम्, अन्धं भवति नेत्रम्, बधिरं भवति श्रोत्रम्। न मे तातेन न वा मल्लिकया कस्यापि अपकृतम्। हे तात, अजातशत्रो, को नाम सुपुत्रो मर्षयेत् तातस्य ईदृशं वधम्?

मल्लिका –

हे दुष्यन्त, सदैव नूतनरुचे, मुग्धां मुनेराश्रमे
शुद्धां कोमलमानसामकितवां शान्तां मुनेः कन्यकाम्।
प्रेमालापशतैर्विमोह्य मधुरां तां विस्मृतस्त्वं कथं
धिक् त्वां क्रीडनकं सुखेन कुरुते यो मुग्धबालाजनम्॥

ललाटः – उन्मत्तापि तथ्यमाह ।

मल्लिका – देवि, गृहाण इमां वकुलमालाम् । मां मा विस्मर । इदं तमालपत्रं गृहाण । एतेन उद्बुद्धा भविष्यसि ।

ललाटः – उन्मादेऽपि अविकलः अस्याः विवेकः ।

मल्लिका – राज्ञि, इदं निर्गन्धं कर्णिकारं गृहाण । अस्य वर्णप्रकर्षः अन्यं प्रतारयति । राजन्, इदं ते हरितचम्पकम् । मधुरगन्धमपि विषदिग्धम् । कुमार, इदं मदनपुष्पम् । अर्धं तव, अर्धं मम । अनेनैव वधूमण्डनं भविष्यति । आदौ वाङ्निश्चयः, अनन्तरं प्रतारणम् । कटाक्षं दत्त्वा हृदयं जग्राह । मया तु-हृदयं दत्त्वा उन्मादो गृहीतः । पर्युषितं पुष्पमिव म्लानो मम तातः । न पुनः प्रत्यग्रः भविष्यति ।

ललाटः – अस्याः उन्मादोऽपि कामपि अपूर्वां श्रियं पुष्णाति ।

मल्लिका –

नैव कदाचित् प्रत्यागच्छेत् ।
नैव कदाचित् प्रत्यागच्छेत् ।।
इदं जगत् त्यक्त्वा निरगात् ।
रविबिम्बं भित्त्वा निरगात्
नैव कदाचित् प्रत्यागच्छेत् ।।
हिमवद्धवला वालाः सर्वे ।
भाले तिलको वसनं शुभ्रम् ।
गतो विलोकं गतो विलोपम् ।
रोदिति दीनं बन्धुजनस्तम् ।
नैव कदाचित् प्रत्यागच्छेत् ।।

ईश्वरः मृतात्मनः सद्गतिं विदधातु । भगवन्, सर्वेषु भद्रं वितर । (निष्क्रान्ता ।)

ललाटः – अनन्तकोटिब्रह्माण्डनायक, सर्वसाक्षिन्, दृष्ट्वाऽपि कथम् उपेक्षसे ?

राजा – तव शोकेन ममापि हृदयं विदीर्णम् । आ बाल्यात् तव पिता अहं च समदुःखसुखौ सुहृदौ । तत् संशयमापन्ने मम चरिते, एवं क्रियताम् । राज-सभायां ये तव विश्वसनीयाः सुहृदः, तानाहूय अशेषं वृत्तान्तं निवेदयामः । यत

ते निर्णेष्यन्ति, तन्मे प्रमाणम्। यदि ते मम दोषं पश्यन्ति, तर्हि मम सिंहासनं, किं बहुना प्राणानपि ते समर्पयामि। यदि अहं निर्दोषः, तर्हि उभौ अपि तव पितृवधं सहैव प्रतिविधास्यावः।

ललाटः – अनुमतमेतत्। परं कथं मे पिता सहसा मृतः? जीवति पुत्रे, नान्यस्य अधिकारः पितुः और्ध्वदेहिकं कर्तुम्। तत् कुतोऽहं नाहूतः? सकलवीरुद-मण्डितस्य तस्य अमात्योचिता अन्त्यक्रिया कुतो न निर्वर्तिता? मृतात्मनः शान्तये गोप्रदानं, हिरण्यप्रदानं वा, कुतो न कृतम्? सर्वमहं ज्ञातुमिच्छामि।

राजा – एहि। अचिरादेव सर्वं ज्ञास्यसि। राजसभाम् आकार्य अपराधिनं मृत्युदण्डेन दण्डयामः।

ललाटः – देव, किं राजसभया? त्वमेव सर्वं निवेदय। त्वं हि मम पितृव्यभूतः।

राजा – निवेदयामि, यदि ते मयि विश्वासः। वत्स, येन तव पिता हतः, स मामपि हन्तुमुद्यतः।

ललाटः – यदि सत्यमेतत्, कुतो न पूर्वमेव दण्डितः स दुरात्मा?

राजा – अस्ति तत्रापि किंचित् कारणम्। तस्य माता दुर्गदेशस्य सम्राज्ञी।

ललाटः – तत् किं चन्द्रसेनेन हतो मे तातः?

राजा – ललाट, अलं कोपेन। माऽस्तु संक्षोभः। शान्तेन मनसा सर्वं शृणु। चन्द्रसेनो नाम वसुमत्याः अपरं जीवितम्। सा च मम द्वितीयं हृदयम्। तां विना क्षणमपि स्थातुं न शक्नोमि। सा च पुत्रवत्सला न मर्षयेत् चन्द्रसेनस्य उदग्रं देहदण्डम्। अन्यच्च, बहुमतः चद्रसेनः प्रजानाम्। सहसा यदि तस्मिन् शस्त्रमुद्यतम्, वयमेव प्रजानां कोपानले भस्मसाद् भविष्यामः। तव तातः अस्माकं राजनिष्ठः सचिवः। तस्य निधनेन यन्मम दुःखम्, तत् प्रकटयितुम् अपर्याप्ताः शब्दाः।

ललाटः – विष्णुगुप्त इव नीतिनिपुणो मे तातः व्यापादितः, शकुन्तलेव मूर्तिमती सत्क्रिया मम मल्लिका उन्मादं नीता। येन इदमकार्यं कृतम्, नास्ति तस्य वधादृते अन्यत् शासनम्।

(ततः प्रविशति दूतः।)

दूतः – जयतु जयतु महाराजः। देव, कुमारचन्द्रसेनस्य सकाशाद् द्वौ लेखौ अत्र संप्राप्तौ – एको देवस्य, अपरो देव्याः।

राजा – किं चन्द्रसेनस्य सकाशात्? केन उपनीतौ?

दूतः – केनचिन् नाविकेन। दृष्ट्वा देवः प्रमाणम्।

(इति निष्क्रान्तः।)

राजा – (लेखं दृष्ट्वा) ललाट, श्रूयताम्। (पठति।) राजाधिराजचरणयोः प्रणिपातपुरस्सरं निवेदयामि – यद् अशरणः एकाकी अहं भवद्राज्यम् अद्यैव प्रविष्टः। श्वः प्रातः कृपाकटाक्षेण माम् अनुग्रहीतुम् अर्हति महाराजः। तदानीमेव कुतोऽहं सहसा प्रत्यागतः, तद् विस्तरेण निवेदयामि। भवत्कृपानुजीवी, – चन्द्रसेनः।

राजा – किमनेन सूच्यते? किं वञ्जुलमञ्जुलौ अपि प्रत्यागतौ? उत अस्ति किंचिदत्र छलम्?

ललाटः – किं चन्द्रसेनेन स्वयमेव इदं लिखितम्?

राजा – नास्ति संशयः। चन्द्रसेनस्यैव इदं हस्ताक्षरम्। अशरणः एकाकी प्रत्यागतः इति लिखति; कस्तस्य अभिप्रायः? ललाट, किं त्वं मन्यसे?

ललाटः – राजन्, दिङ्मूढोऽहं संवृत्तः। आगच्छ रे नृशंस, पितृघातकस्य कीदृशं भवति शासनम्, तत् स्वयमेव दर्शयामि।

राजा – (स्वगतम्) मया चिन्तितमेव अयं मन्त्रयते। (प्रकाशम्) ललाट, माऽस्तु अविचारः। श्रूयतां वृद्धस्य मम उपदेशः।

ललाटः – शृणोमि, यदि शममाचरितुं न उपदिशसि।

राजा – मया तथा उपायः चिन्तितः, यथा अग्निना शलभ इव चन्द्रसेनः स्वकर्मणा विनष्टो भवेत्। एवं वधकलङ्कोऽपि नाऽस्मान् अणुमात्रं स्पृशेत्। दैववशादयं हत इति मत्वा तस्य जननी अपि अस्मान् न दूषयेत्।

ललाटः – रमणीयो मन्त्रः। परं तथा विधीयतां, यथा तस्य रुधिरेण ममैव खड्गः स्नास्यति।

राजा – तथैव संकल्पितम्। काम्पिल्यनगरे त्वया खड्गविद्यायां परं कौशलम् अवाप्तम्। अप्रतिमः खड्गयोद्धा इति सर्वत्र प्रसृतं ते यशः। तत् श्रुत्वा चन्द्रसेनस्य मनसि मत्सरेण पदं कृतम्। स किल खड्गयुद्धे त्वां पराजेतुमिच्छति। परं ललाट, सत्यं ब्रूहि, अपि निश्चला ते भक्तिः पितरि?

ललाटः – देव, किम् इदमपि वक्तव्यम्?

राजा – वत्स, जानामि ते पितृभक्तिम्। सर्वे एव पुत्राः मृतं पितरम् अनुशोचन्ति।

ललाटः – परं कश्चिदेव पितृवधामर्षी शूरः शस्त्रद्वितीयः संग्रामम् अवतरति।

राजा – साधु। तदेवं भवतु। तव खड्गकौशलं यथा वारंवारं तस्य कर्णगतं भवेत् तथा करोमि। ललाटः त्वां खड्गयुद्धाय आह्वयते इत्यपि तस्मै संदिशामि। स तेजस्वी तव आह्वानं न कदापि निराकरिष्यति। तत् संनद्धो भव।

ललाटः – युज्यते। अन्योऽपि उपायः मया चिन्तितः। अस्ति मत्समीपे प्राणघातकं कालकूटम्। तेन विलिम्पामि खड्गधाराम्। खड्गयुद्धे विषलिप्तेन शस्त्रेण प्रहृतं कुमारं धन्वन्तरिरपि जीवयितुं न शक्नुयात्।

राजा – ललाट, प्रेक्षापूर्वकं प्रयुक्तोऽपि उपायः कदाचिद् विधिना विसंवादितो भवति। अतः कार्यार्थी जनः अवश्यसाधनीये कार्ये बहून् उपायान् प्रयुङ्क्ते। खड्गयुद्धेन श्रान्तः कुमारः पानीयं याचेत। तदानीम् अहमपि कृतकस्नेहेन विषसंपृक्तां मदिरां तृषार्ताय तस्मै उपहरेयम्। एवं कदाचित् खड्गप्रहारान् मुक्तोऽपि यमपाशान् न मुच्येत।

(ततः प्रविशति राज्ञी।)

राजा – प्रिये, कः समाचारः ?

राज्ञी – आर्यपुत्र, विपदः विपदम् अनुबध्नन्ति। यावदेकस्य दुःखस्य अन्तं न गच्छामः, तावद् द्वितीयम् उपस्थितम्। अमात्यमृत्युना दुःखितेषु अस्मासु अपरोऽयम् अशनिप्रहारः

राजा – किं संवृत्तम् ? सत्वरं कथय।

राज्ञी – वत्स ललाट, भगिनी ते गङ्गाजलेन विप्लाविता।

ललाटः – विप्लाविता ? कथमेतत् ?

राज्ञी – इतः प्रस्थाय सा वराकी गङ्गातीरं गता। तत्र कुसुमानि अवचित्य तया पुष्पाणां माला ग्रथिता। पुष्पितं चम्पकमेव प्रियं मत्वा यावत् पतिंवरा सा मालाम् अर्पयितुं प्रवर्तते, तावदेव पादस्खलनेन गङ्गाजले निपतिता। क्षणमात्रं गङ्गाजले प्लवमाना किन्नरीव विवाहगीतानि मधुरं गायन्ती कण्ठलग्नमपि मृत्युपाशं नापश्यत्। सत्वरमेव जलपूरणेन निरुद्धश्वासा पञ्चत्वम् अगमत्।

ललाटः – उपरता तर्हि मल्लिका ? मल्लिके, कथं माम् एकाकिनं विहाय स्वर्लोकं गतासि ? (रोदिति ।)

राज्ञी – वत्स, समाश्वसिहि, समाश्वसिहि ।

राजा – वत्स, अलमनेन अश्रुपातेन । किमत्र कर्तव्यं दैवायत्त वस्तुनि ? निगृह्य शोकं स्वकार्यं साधयन्ति कृतिनः ।

ललाटः – मल्लिके, उपरतायां त्वयि उच्छ्वसन्नपि अहं लज्जे । अवश्यकरणीयेष्वपि माम् अपृष्ट्वा न किंचिद् उपक्रमसे । अद्य पुनः मामेकाकिनं विहाय कथं स्वर्लोकं गच्छसि ? मल्लिके, शोभसे खलु तातस्य दुहिता, या स्वर्गेऽपि तमनुगच्छति । एषोऽहं त्वामनुगच्छामि । (निष्क्रान्तः ।)

राजा – वसुमति, क्रोधान्धो ललाटः कदाचिद् अकार्यम् अनुतिष्ठेत् । तदेहि, तमेव अनुसरावः ।

द्वितीयः प्रवेशः ।

(श्मशानम् । ततः प्रविशति अस्थिहरः चिताकरश्च ।)

अस्थिहरः – रे चिताकर, येन नाम स्वयमेव आत्मा घातितः, किं तस्य शास्त्रेण विहितो मन्त्राग्निः ?

चिताकरः – अरे अस्थिहर, त्वं तावत् अस्थिसंचयमेव जानासि, नान्यत् किमपि । स मृत्युञ्जयशास्त्री धर्मसिन्धुमपि अपठित्वा शास्त्रार्थं निर्णयति । जानासि ?

अस्थिहरः – स मृत्युशास्त्री दक्षिणामेव जानाति । यथा दक्षिणा, तथा शास्त्रम् । स्वधां कृत्वा स्वाहा करोति । स्वाहाकर्तुं नवं शास्त्रं करोति । प्रभूतं धनं स्वीकृत्य किमपि वदति । पश्यसि ? आत्मघातेन मृतानाम् अमन्त्रक एव अग्निसंस्कार, इति पश्यत एव पलितं मे शिरः । आत्मघातो हि महापातकम् । पश्यसि ?

चिताकरः – रे अस्थिहर, पश्य । इह तावत् जलं स्थितम् । जानासि ? इह तावत् माणवकः स्थितः । जानासि ? यदि माणवकः जले आत्मानं पातयति, स आत्मघातः । स दोषाय भवति । जानासि ?

अस्थिहरः – सत्यं जानामि।

चिताकरः – परं यदि जलमेव माणवकं प्लावयति, न स आत्मघातः। जानासि ? स न दोषाय भवति।

अस्थिहरः – परम् अनयैव आत्मा घातितः। न तत्र जलस्य अपराधः। पश्यसि ? अतः न कदापि शास्त्रविहितम् अग्निसंस्कारम् अर्हति सा।

चिताकरः – अरे शम्भो, पामराणां कृते धर्मशास्त्रम्, न धनिकानाम्। न तेषां कृते विधिः, न वा निषेधः। जानासि ? जले पातयन्ति, पाशेन उद्‍बध्नन्ति, तथापि समन्त्रकम् अग्निसंस्कारं लभन्ते। जानासि ? ब्राह्मणा पुनः गोप्रदानं सुवर्णप्रदानं, मृतस्य वस्त्रप्रावरणादिकं लभन्ते। किं तेषां शास्त्रेण ? जानासि ?

अस्थिहरः – सत्यम्। अस्माकं पुनः काष्ठानि आहर, चितां विरचय, अस्थीनि संचिनु, इति इदमेव शास्त्रेण विहितम्। पश्यसि ? वयं श्मशानसेवकाः, यदादिष्टं तत् अस्माभिः कर्तव्यम्। गच्छ, शाम्भवीम् उपहर। शम्भुतीर्थं पीत्वा शिवं प्रीणयावः।

चिताकरः – प्रथमं तावद् भूमिं संमार्जय। अस्थीनि संचिनु। रक्षाम् अपहर। जानासि ? गच्छ। आनय संमार्जनीम्। अधुनैव आगच्छेत् प्रेतः। जानासि ?

(निष्क्रान्तः अस्थिहरः। ततः प्रविशतः हर्षनादचन्द्रसेनौ।)

चिताकरः – **आसीत् प्रिया मम पुरा नवकोमलाङ्गी**
भार्यां विना मम तदा जगदेव नासीत्।
काले गते पितृवने मृतकार्यकारी
मन्ये कदाचिदपि नैव युवाहमासम्॥

चन्द्रसेनः – वयस्य, श्मशानवासी अयं माणवकः औचित्यमपि न जानाति। अमङ्गले श्मशानसंमार्जने मग्नोऽपि प्रेमगीतानि गायति।

हर्षनादः – रात्रिंदिवं प्रेतैः सह निवसतः अस्य लुप्तः शुभाशुभविवेकः। श्मशानमेव आनन्दनिधानं तस्य।

चन्द्रसेनः – एवमेतत्। कः सन्देहः ?

चिताकरः – प्रतिदिवसं प्रेतकर्माणि कुर्वन् प्रेत इव अचेतनोऽहं संवृत्तः। नास्ति मे रागः, न वा द्वेषः।

(इति नरकपालम् उद्‍धृत्य हस्ते धारयति।)

चन्द्रसेनः – अयं दुरात्मा कन्दुकैरिव क्रीडति एभिः नरकपालैः। पश्य इदं कपालम्। कदाचित् अनेन वाक्पाटवेन राजसभा जिता स्यात्। कदाचित् गन्धर्वमधुरेण स्वरेण अनेन रसिकानां चेतांसि आवर्जितानि स्युः। कदाचित् विषयलम्पटेन सोदरस्य भार्याऽपि भ्रंशिता स्यात्। कदाचित् अनेन नृपाङ्गण-गतेन खलेन पैशुन्यं प्रयुज्य नैके साधवो विनाशिताः स्युः। कदाचिदनेन अनृतानि प्रतिज्ञापत्राणि कारयित्वा स्वामिनः स्वधनात् वञ्चिताः स्युः। सर्वं यस्य वशादगात् स्मृतिपथं, कालाय तस्मै नमः। तदिमं तावत् पृच्छामि। भद्र, कस्येयं चिता ?

चिताकरः – ममैव इयम्। जानासि ?

चन्द्रसेनः – जानामि। यस्मात् त्वं विरचयसि, तस्मात् तवैव।

चिताकरः – त्वं खलु चितां नाधिरोहसि, अतः नैषा तव। जानासि ? अहमपि चितां नाधिरोहामि, तथापि ममैव इयं चिता। जानासि ?

चन्द्रसेनः – भद्र, अलं परिहासेन। मृतानां चिता कल्प्यते, न जीवताम। तत् कथय, कस्येयं चिता, पुरुषस्य स्त्रियो वा ?

चिताकरः – न कस्यापि। जानासि ?

चन्द्रसेनः – तत् कः पुनरिमाम् आरोक्ष्यति ?

चिताकरः – या मरणात् पूर्वं युवतिरासीत्। जानासि ?

चन्द्रसेनः – रे श्मशानवासिन्, राजसभायाम् ईदृशस्य वाक्छलस्य अवकाशः, न पितृवने। भद्र, कियत् चिरम् अत्र श्राम्यसि ?

चिताकरः – यस्मिन् दिवसे युवराजः चन्द्रसेनः अजायत, तस्मिन्नेव दिवसे मया गृहीतोऽयमाजीवः। जानासि ?

चन्द्रसेनः – शोभनः खलु मुहूर्तः त्वया अन्विष्टः।

चिताकरः – परम् अधुना स कुमारः उन्मत्तः।

चन्द्रसेनः – किं तस्य उन्मादकारणम् ?

चिताकरः – बुद्धिभ्रंशेन तस्य उन्मादः। संप्रति स अङ्गदेशं प्रेषितः। जानासि ?

चन्द्रसेनः – कुतः ? किं तत्र सः प्रकृतिम् आपत्स्यते ?

चिताकरः – सर्वे एव तत्र उन्मत्ताः। क एनं लक्षयेत् ? जानासि ? (ततः प्रविशन्ति पुरोहितः, ललाटः, राजा, राज्ञी, मल्लिकाशवानुयायी परिजनश्च।)

चन्द्रसेनः – अहो, कथमयं राजपरिवारः ? कस्येदं कलेवरम् ? कश्चित् महाकुल-संभूतो दृश्यते। तदेकान्ते तिष्ठावः। (किंचित् अपसृत्य निभृतं तिष्ठतः।)

ललाटः – कः खलु संस्कारः अनुष्ठेयः ?

चन्द्रसेनः – अये ललाटः, तेजस्वी तरुणः।

ललाटः – पुरोहित, अपि कश्चिद् अवशिष्टः संस्कारः ?

पुरोहितः – यत् कृतं, तदेव अधिकम्। नास्ति अनूढायाः शास्त्रेण विहितः संस्कारः। तत्रापि अनया स्वयमेव आत्मा घातितः। महाकुलसंभूता इति एतावान् विधिः अनुष्ठितः।

ललाटः – असंस्कृतो मृतात्मा कथं सद्गतिं प्राप्नुयात् ? पुण्यशीला मे भगिनी, सद्गतिमर्हति। पितृसूक्तं तावत् पठ।

पुरोहितः – यद् भवानाह। (इति पितृसूक्तं पठति।)

चन्द्रसेनः – कथमियं मल्लिका ?

राज्ञी – वत्से, अपश्चिमस्ते प्रणामः। दिव्यान् लोकान् अवाप्नुहि। मल्लिके, चन्द्रसेनस्य त्वमेव सदृशी वधूः, इति पूर्वं मया संकल्पितम्। त्वदर्थं वधूमण्डनमपि मया कल्पितम्। परं वधूदुकूलेन कलेवरमण्डनम् आपतितम्। मम सर्वोऽयं मनोरथः विधिना विसंवादितः। हा हन्त हन्त सर्वं विलयं गतम्।

ललाटः – प्रिये मल्लिके, येन त्वम् ईदृशीम् अवस्थां प्रापिता, स दुरात्मा न कदापि शान्तिमवाप्नुयात्। भो भोः पुरुषाः, क्षणं विरमत। अग्निना चितां मा प्रज्वालयत। यावदहं मातृपितृविहीनाम् अभागिनीं मे भगिनीम् एकवारम् अवलोकयामि। (इति तन्मुखं परामृशति।) मल्लिके, तिष्ठ। अहमपि त्वां नचिराद् अनुगच्छामि। तत् प्रदीपयत चिताम्। भगवन् हुताशन, यदि उत्कटं मे भगिनीवात्सल्यम् आलिङ्गस्व मां स्वज्वालाभिः।

चन्द्रसेनः – (प्रविश्य) अहो, कोऽयं दीनम् आक्रोशति यस्य शोकेन सूर्योऽपि चित्रस्थ इव निरुद्धगतिः तिष्ठति। अयमहं भोः, महेन्द्रवर्मणः सूनुः चन्द्रसेनः।

ललाटः – (चन्द्रसेनं केशेषु गृहीत्वा) रे रे राजकुलकलङ्क, अमात्यघातिन्, अधुनैव त्वां यमसदनं प्रेषयामि।

चन्द्रसेनः – ललाट, क्रोधं संहर। मुञ्च माम्। नाहं प्रकृत्या आततायी। परं दैवोपहतस्य मे मनः कदाचिद् विकारं भजते। तन्मुञ्च माम्। विरम अस्मात् साहसात्। अयमविचारः विनाशाय भवेत्।

राजा – वत्सौ, अलमावेगेन।

राज्ञी – वत्स चन्द्रसेन, विरम।

हर्षनादः – कुमार, समाहितो भव।

चन्द्रसेनः – ललाट, प्रिया ते मल्लिका; परं ब्रूहि किं त्वं तदर्थं करिष्यसि? किं रोदनम्, आयोधनम्, उपवासम्, विषपानम्, अग्निकाष्ठभक्षणं वा? तत् सर्वम अहमपि करिष्ये। वाचाट, सा मम जीवितसर्वस्वमासीत्। भ्रातृशतेभ्योऽपि गरीयान् दयितो युवतीनाम्।

राज्ञी – ललाट, उन्मत्तश्चन्द्रसेनः। तदकालोऽयं क्रोधस्य।

चन्द्रसेनः – ललाट, त्वयि मे भ्रातृनिर्विशेषं वात्सल्यम्। त्वं पुनः अकारणमेव मयि वैरं भजसे।

राजा – हर्षनाद, सान्त्वय एनम्। प्रिये, त्वमपि चन्द्रसेनं समाश्वासय। ललाट, अचिरादेव अयं प्रक्षोभः शममेष्यति। तद् धीरो भव।

(निष्क्रान्ताः सर्वे।)

तृतीयः प्रवेशः

(दुर्गस्थः प्रकोष्ठः। ततः प्रविशति चन्द्रसेनः हर्षनादश्च।)

चन्द्रसेनः – हर्षनाद, खिन्नं मे मनः श्मशानकलहेन। यदेव परिहर्तव्यं तदेव परिणतम्। ललाटस्य दर्पोद्धतेन वचसा मम सहजोऽपि संयमः विलयं गतः। तद् गत्वा तं क्षमां याचिष्ये।

हर्षनादः – विस्मर तत्। इतः अङ्गदेशं प्रस्थिते त्वयि, यद् वृत्तं तत् सर्वं श्रोतुमिच्छामि।

चन्द्रसेनः – शृणु। नौकया प्रस्थितः अहं विषण्णः अभूवम्। न मे शान्तिः, न वा स्वापः। मम जीवितमेव संशयमारूढम्। प्रक्षुब्धः सागरः। नभोमण्डलमपि

कृष्णमेघैः आक्रान्तम्। विद्युदपि घनगर्जितैः साकं विद्योतते स्म। चाण्डालौ वञ्जुलमञ्जुलौ गाढं सुप्तौ। तस्मिन् घनान्धकारे एव तयोः प्रकोष्ठम् अहं निभृतं प्रविष्टः। यावदितस्ततः परामृशामि, तावत् तयोः वस्त्रान्ते प्रयत्न-परिरक्षितं राजपत्रम् अद्राक्षम्। तद् अपहृत्य मया पठितम्।

हर्षनादः – किमासीत् तत्र ?

चन्द्रसेनः – कौटिल्यं कुटिलमतेः। तत्र अङ्गराजः मम पितृव्येण एवम् आदिष्टः, 'पठितमात्रे अस्मिन् राजपत्रे, चन्द्रसेनस्य शिरः खड्गेन शतशः खण्डनीयम्'।

हर्षनादः – कथमेतत् संभाव्यते ?

चन्द्रसेनः – पश्य इदं राजपत्रम्। स्वयमेव पठितुमर्हसि।
(इति राजपत्रमर्पयति।)

हर्षनादः – (पठित्वा) कथमयं दुरात्मा पुत्रतुल्यं भ्रातृव्यं निहन्तुमुद्यतः ? अथवा विनाशकाले विपरीतबुद्धिः।

चन्द्रसेनः – अनन्तरं तद् राजपत्रं विनाश्य अन्यदेव राजपत्रं मया लिखितम्। अयं तस्य सारः, एतत्पत्रम् आदाय त्वत्समीपमागतौ चाण्डालौ क्षणेनैव यमसदनं प्रेषणीयौ। तदेव उभयोः राष्ट्रयोः कल्याणाय भविष्यति।

हर्षनादः – वयस्य, परं कथं तत् पत्रं राजमुद्रया अङ्कितम् ?

चन्द्रसेनः – मम हस्ते तातनामाङ्कितम् अङ्गुलीयकम् आसीत्। तत् कज्जलेन विलिप्य कृता मया राजमुद्रा।

हर्षनादः – एवं तौ उभौ परलोकं प्रेषितौ।

चन्द्रसेनः – किं करोमि ? स्वकर्मणैव तौ विनष्टौ। इत्थम् आत्मकृतं पापम् आत्मन्येव फलति।

हर्षनादः – राजा अचिरादेव इमं वृत्तान्तं ज्ञास्यति।

चन्द्रसेनः – अतः तत्पूर्वमेव....

हर्षनादः – तूष्णीं तिष्ठ। कश्चिदित एव आगच्छति।

श्वपतिः – (प्रविश्य) स्वागतं स्वदेशं प्रतिनिवृत्तस्य युवराजस्य।

चन्द्रसेनः – अनुगृहीतोऽस्मि। (जनान्तिकम्) हर्षनाद, जानासि इमं जाल्मम् ?

हर्षनादः – (जनान्तिकम्) नाहं जाने।

चन्द्रसेनः – (जनान्तिकम्) तेन हि धन्यस्त्वम्। एवंविधस्य नामस्मरणमपि पापाय कल्पते। अयं हि महतः क्षेत्रस्य स्वामी। शतशः अस्य गावः। क्षेत्रपतिरयं धेनुवल्लभः।

श्वपतिः – यदि चेत् न अन्यकार्यातिपातः, महाराजस्य संदेशं युवराजस्य निवेदयितुमिच्छामि।

चन्द्रसेनः – अवहितोऽस्मि। प्रथमं तावत्, स्रस्तं तव उष्णीषं सुविहितं कुरु।

श्वपतिः – ग्रीष्मेण संतप्तः कर्णः, इति कर्णविलम्बि कृतमुष्णीषम्। सुदुःसहः खलु ग्रीष्मातपः।

चन्द्रसेनः – नैवम्। पशुपते, मम तावत् शैत्येन कम्पते शरीरम्। शीताः खलु हेमन्तवाताः।

श्वपतिः – सत्यमेतत्। मामपि शैत्यमेव बाधते।

चन्द्रसेनः – परं मेघच्छन्नं नभः, आतपबहुलश्च दिवसः।

श्वपतिः – सत्यम्। घर्मक्लिन्नानि मे अङ्गानि।

चन्द्रसेनः – (जनान्तिकम्) यो हेमन्तः सर्वेषाम्, सोऽस्य निदाघो भवति। लाङ्गूलचालनं हि स्वभाव एव राजपरिजनस्य।

श्वपतिः – युवराज, ललाटस्त्वां खड्गयुद्धार्थम् आह्वयते। नास्ति मत्समः खड्गयुद्धे इति सततं विकत्थते सः। तदाह्वानं निवेदयितुमेव महाराजेन अहं प्रेषितः।

चन्द्रसेनः – प्रथमं तावत् उष्णीषं सुविहितं कुरु।

श्वपतिः – युवराज, अद्य ललाटः राजसभायाम् उपस्थितः। स खलु सुचरितः, विनीतवृत्तः, उदारसत्त्वः, किं बहुना सकलकलानाम् आयतनम्। खड्गयुद्धे प्रतिरावणः, जरासन्ध इव सत्यसन्धः, धृतराष्ट्र इव चक्षुष्मान्, किं बहुना सकलगुणभाण्डागारम्।

चन्द्रसेनः – श्वपते, प्रभूतं ते शब्दभाण्डारम्। परम् अलमनेन ललाटसूक्तेन। आ शैशवात् परिचितो मे तस्य गुणगणः। किमर्थमद्य स तव रसनायां नरीनर्ति, तत् मम श्रवणपुटं प्रवेशय।

श्वपतिः – खड्गयुद्धे निरुपमं तस्य कौशलम्। अद्वितीयोऽयं खड्गयुद्धे इति सर्वे तं स्तुवन्ति। यस्तं जेष्यति, तस्य गान्धाराः खड्गाः, मैथिलाः सन्नाहाः,

कालिङ्गाश्चर्मपट्टाः तेन पणीकृताः। यश्चन्द्रसेनं जष्यति तस्य शतं सैन्धवा अश्वाः, पञ्चाशद् द्राविडाश्च गजाः प्रतिपणीकृताः। तदयं रामरावणयोरिव क्षत्रब्राह्मणयोः संगरः।

चन्द्रसेनः – बृहस्पते, केन गुरुणा पाठितोऽयं शब्दराशिः ?

श्वपतिः – युवराज, महाराजेन अयं समयः कृतः, द्वादशप्रहारके युद्धे, ललाटः यदि अधिकं प्रहारत्रयं करिष्यति, तर्हि तस्य जयः, अन्यथा तव। तच्च खड्गाखड्गि अधुनैव निर्वर्तनीयम् इति राजादेशः। अपि स्वीकुरुषे आह्वानम् ?

चन्द्रसेनः – स्वीकृतम् आह्वानम्। निवेदय देवाय, प्रस्थितश्चन्द्रसेनः द्वन्द्वभूमिम्।

श्वपतिः – यथाऽऽज्ञापयति युवराजः। (निष्क्रान्तः।)

हर्षनादः – कुमार, विजयस्व द्वन्द्वयुद्धे। परं किमिति चिन्ताकुलं ते मुखम् ?

चन्द्रसेनः – सखे, नास्ति मे युद्धाद् भयम्। चिरमभ्यस्तं मया खड्गयुद्धम्। परम् अस्वस्थोऽहम्। नास्ति मे समाहितं मनः। महान्तम् उत्पातं पश्यामि।

हर्षनादः – कुमार, तन्माऽस्तु अधुना युद्धम्। अद्य अस्वस्थः कुमारः न शक्नोति योद्धुम्, इति निवेदयामि महाराजाय।

चन्द्रसेनः – नैतद् उचितं शूरस्य युद्धात् पलायनं नाम। नहि शुभाशुभं पर्यालोचयन्ति धीराः। तद् विक्रमैकरसं तातम् अनुस्मृत्य द्वन्द्वभूमिं गच्छामि।

दूतः – (प्रविश्य) कुमार, देव; देवी, मन्त्रिणः, मध्यस्थाश्च द्वन्द्वभूमिं पूर्वमेव गताः। सर्वे कुमारं प्रतीक्षन्ते। अपि सज्जः कुमारः, इति पृष्टं देवेन। देवी च शुभाशंसनपूर्वकं कुमारम् इदमाह, ‘ युद्धात् पूर्वं ललाटेन सह दाक्षिण्येन वर्तस्व ’ इति। श्रुत्वा कुमारः प्रमाणम्।

चन्द्रसेनः – सम्यगुपदिष्टोऽस्मि देव्या। अयमहमागत एव। तन्मार्गमादेशय।

(निष्क्रान्ताः सर्वे।)

चतुर्थः प्रवेशः

(नेपथ्ये तूर्यनादः। राजा, राज्ञी, ललाटः, मध्यस्थः, परिजनश्च उपविष्टाः। ततः प्रविशति चन्द्रसेनः।)

चन्द्रसेनः – विजयतां सुतवत्सलो महाराजः।

राजा – यदिच्छामि ते तदस्तु। वत्स, परिष्वजस्व अमात्यपुत्रं ललाटम्।

चन्द्रसेनः – (ललाटं परिष्वज्य) वयस्य, क्षम्यतामयं जनः। संमोहपीडितेन मया अपराद्धम् अमात्यपुत्रस्य। प्रकृतिस्थः चन्द्रसेनः न कस्यापि अपराध्यति। यस्त्वयि कृतापराधः न स चन्द्रसेनः, किन्तु चन्द्रसेनमाविष्टः मोहकलिः। ललाट, अजानता मया यदाचरितम्, तदर्थं सर्वेषां समक्षं प्रणामाञ्जलिं बद्ध्वा क्षमां याचते महेन्द्रवर्मणः सूनुः चन्द्रसेनः। तद् वयस्यः उदारधिया मां क्षन्तुमर्हति।

ललाटः – कुमार, प्रीतोऽस्मि तव विनयमधुरेण वचसा। अतः पूर्वग्रहमपास्य तव स्नेहं सौहार्देन स्वीकरोमि।

चन्द्रसेनः – सदृशमेतद् उदारचरितस्य। श्वपते, खड्गं तावदानय।

ललाटः – मदर्थमपि एकमुपनय।

चन्द्रसेनः – ललाट, खड्गविद्यायाम् अनभिज्ञे मयि निपतिष्यति तव दीप्तिमान् खड्गः घनान्धकारे विद्युदिव।

ललाटः – कुमार, किमर्थम् उपहससि माम् ? सर्वजनविश्रुतं तव खड्गकौशलम्।

राजा – चन्द्रसेन, विदितस्ते खड्गयुद्धस्य समयः ?

चन्द्रसेनः – साधु विदितः। तात, सुतपक्षपाती विषमोऽयं समयः।

राजा – गुरुकुले खड्गविद्यायां समधिकं कौशलम् अवाप्तं ललाटेन। तस्मात् नायं विषमः समयः।

ललाटः – (खड्गान् निरीक्ष्य) गुरुतरोऽयं खड्गः। तदपरं दर्शय।

चन्द्रसेनः – अपि समपरिमाणा इमे खड्गाः ?

श्वपतिः – कुमार, अथ किम्।

राजा – श्वपते, सुराकुम्भान् चषकांश्च आनय। चन्द्रसेनस्य विजयार्थं सर्वे वयं सुरां पिबामः। अयं हि सुवर्णचषकः चन्द्रसेनस्य। तं स्वयमेव मदिरया पूरयामि। प्रवर्ततां तूर्यनिर्घोषः। ताडयतां दुन्दुभिः। वत्सौ, उपक्रमेताम्। मध्यस्थ, अवहितो भव।

चन्द्रसेनः – ललाट, एहि तावत्।

ललाटः – कुमार, एहि।

चन्द्रसेनः – एष प्रहृतोऽसि ।

ललाटः – नैवम् ।

मध्यस्थः – प्रहृतोऽसि । असंशयं प्रहृतोऽसि ।

ललाटः – भवतु । पुनस्तावत् ।

राजा – चन्द्रसेन, तिष्ठ । स्वीकुरु इमां मदिराम् ।

चन्द्रसेनः – प्रथमं द्वन्द्वम्, अनन्तरं मदिरा । (ललाटं प्रति) एहि । पुनः प्रहृतोऽसि । किं त्वं मन्यसे ?

ललाटः – निर्विवादम् अङ्गीकरोमि ।

राजा – जेष्यति आवयोः पुत्रः ।

राज्ञी – द्रढिष्ठो बलिष्ठश्च मे वत्सः । वत्स, एहि अनेन अञ्चलेन अपाकरोमि ते घर्मजालम् । विजयस्व पुत्र । तव विजयार्थं मदिरां पिवामि ।

चन्द्रसेनः – अम्ब, नवीकृतोऽस्मि तव वचसा ।

राजा – प्रिये, मा पिब इदं मद्यम् ।

राज्ञी – ननु पिबामि । प्रसीद । (इति पिबति ।)

राजा – (जनान्तिकम्) अरे, पीतमेव मद्यम् । विषमिश्रा इयं मदिरा । हन्त, समाप्तम् अस्याः जीवितम् । अन्यद् उपक्रान्तम्, अन्यत् च परिणतम् ।

ललाटः – एषोऽहं प्रहरामि । (चन्द्रसेनं खड्गेन प्रहरति । उभयोः खड्गौ भूमिं पततः । संभ्रान्तौ खड्गविपर्ययं कुरुतः ।)

ललाटः – कुमार, संभ्रान्तेन त्वया गृहीतो मे खड्गः । अयं ते खड्गः मद्धस्ते तिष्ठति । गृहाण इमम् ।

चन्द्रसेनः – ललाट, उभौ समपरिमाणौ । कुतोऽयम् अस्थाने अभिनिवेशः ? तदेहि ।

चन्द्रसेनः – एष प्रहरामि । (प्रहरति ।) ललाट, क्षतौ आवयोः भुजौ । रुधिरं प्रवहति । अहो, अत्याहितम् । अवसीदति मे माता ।

राजा – रुधिरदर्शनेन मूर्च्छिता राज्ञी ।

राज्ञी – नहि, नहि, सुरापानेन । विषदिग्धा सुरा । वत्स चन्द्रसेन, विषप्रयोगो मयि कृतः ।

चन्द्रसेनः – अहो विद्रोहः, अहो विद्रोहः । कोऽयं कृष्णसर्पः राजकुलं दशति? प्रथमं

तावत्, अर्गलया द्वारं पिधीयताम्। अन्विष्यामि विद्रोहिणं विषभुजङ्गम्।

ललाटः – एषोऽयं विषभुजङ्गः राजासनमध्यास्ते। अतःपरं न शक्नोषि मुहूर्तमपि जीवितुम्। विषदिग्धेन खड्गेन प्रहृतौ उभावपि आवाम्। मम कपटं मय्येव फलितम्। राजादेशेन विषदिग्धं खड्गं त्वयि प्रहृतम्। तदेव स्वीकृत्य त्वमपि मां प्रत्याहतवान्। उत्क्रामन्ति मम प्राणाः। तव माताऽपि विषं पायिता। लोभान्धो राजा एव अस्य हत्याकाण्डस्य मूलम्। कुमार, इतःपरं न शक्नोमि वक्तुम्।

चन्द्रसेनः – विषदिग्धः खड्गः। अयि कालकूट, सत्वरम् अपहर अस्य प्राणान्। (राजानम् आहन्ति।)

सर्वे – अहो राजद्रोहः। अहो राजद्रोहः।

राजा – परित्रायध्वं, परित्रायध्वम्। अहं खड्गेन विद्धः। सत्वरं व्रणं विरोपयत।

चन्द्रसेनः – दुरात्मन्, नरपशो, भ्रातृघातक, पीयतां विषमदिरा। अनुभूयतां दुराचारस्य फलम्। (इति बलात् राजानं विषं पाययति।)

ललाटः – स्थाने खलु अपराधी दण्डितः। नास्ति देहान्ताद् ऋते अन्यो दण्डः ईदृशस्य अधमाधमस्य। खड्गस्य विषलेपः अनेनैव कारितः। मदिरायां विषमिश्रणम् अनेनैव कृतम्।

चन्द्रसेनः – ललाट, मम पिता अनेनैव कर्णे विषं निषिच्य मारितः।

(राजा म्रियते।)

ललाटः – वयस्य, न मे वधः त्वां दूषयति, नापि मम पितुः।

चन्द्रसेनः – ललाट, नापि मम वधः त्वां दूषयति। (ललाटः म्रियते।) ललाट, ईश्वरस्ते सद्गतिं वितरतु। अहमपि अनुपदमागच्छामि।

हर्षनादः – चन्द्रसेन, क्षणं विरम। अवशिष्टं विषं पीत्वा अहमपि त्वामनुगच्छामि।

चन्द्रसेनः – वयस्य, न परित्याज्याः त्वया प्राणाः। लोके इमां कथां प्रकाशयितुं चिरं जीव। आमन्त्रये त्वाम्। देवि, मातः, पितृवधामर्षी चन्द्रसेनः त्वां प्रणमति। तात, पितृव्यं निहत्य अनुष्ठितस्ते संदेशः। सफला मे प्रतिज्ञा। पिशाचयोनिं त्यक्त्वा पितृलोकमवाप्नुहि। अयं ते चरमः प्रणामाञ्जलिः।

● ● ●

पितुरुपदेशः ।

शालेय :—

मनसा चिन्तितं कार्यं वचसा न प्रकाशयेत् ।
अविवेककृतं कर्म परिणामे भयावहम् ॥
स्नेहं दर्शय सर्वस्य अति सर्वत्र वर्जयेत् ।
स्वैरं संभाषमाणोऽपि ग्राम्योक्तिं परिवर्जय ॥
परीक्ष्य मित्रं कुर्वीत कृतं विपदि न त्यजेत् ।
स्वयं न कलहं कुर्यात् कृतं मध्ये न संत्यजेत् ॥
अज्ञातकुलशीलस्य स्नेहातिशयदर्शिनः ।
वचो विश्वस्य मधुरं हृदि तं न प्रवेशय ॥
शृणु सर्वस्य वचनं मा ब्रूहि सहसा वचः ।
सर्वेषां निर्णयं श्रुत्वा मनःपूतं समाचर ॥
यथालाभं व्ययं कृत्वा गृहाण वसनं शुभम् ।
महार्हमपि मा भूत् तच्चक्षुषः प्रतिघातकम् ॥
ऋणं न कुर्यात् न परस्य दद्यात्
ऋणेन नाशो धनसौहृदानाम् ।
ऋणेन लब्धं विषमेव सर्वम्
ऋणादृते यद् गरलं सुधा सा ॥
सत्येन वर्त्मना गच्छ सत्यं जयति नानृतम् ।
असत्ये चरिते नाशो ध्रुवानीति मतिर्मम ॥
विनीतवृत्ता गुरुकार्यदक्षाः
स्वाध्यायमग्नास्तपसा पवित्राः ।
गुरोर्गृहे नित्यमधीतविद्याः
विनीतवेषेण समाचरन्ति ॥
उपदेशमिमं सर्वं विद्धि धारय पालय ।
अपास्य चित्तदौर्बल्यं प्रयतस्व शुभाप्तये ॥
एष आदेशः । एष उपदेशः ।

(एकादशे पृष्ठे शालेयोपदेशस्य पद्येन अनुवादः ।)

उक्तानुक्तदुरुक्तानि

पृष्ठम्	पंक्तिः	विद्यमानम्	इष्टम्
६	२२	संक्षपतः	संक्षेपतः
८	२१	**वर्धनकः**	**वर्धनकः**
२	६	किमथ	किमर्थं
३	१७	पूव	पूर्वं
३	१८	अनर्थ	अनर्थं
४	१७	ततः प्रभृति	ततःप्रभृति
४	१९	लघूकर्तुंम्	लघूकर्तुम्
५	६	विज्ञापनीयः	विज्ञाप्यतां
५	२७	आनन्दपूणन	आनन्दपूर्णेन
५	२७	चक्षषा	चक्षुषा
५	२८	अपरिह्राय	अपरिहाय
६	४	नत्रे	नेत्रे
६	५	नैतत् शोकस्य वास्तवं स्वरूपम् ।	नायं शोकस्य आत्मा ।
७	२०	**चंन्द्रसेनः**	**चन्द्रसेनः**
८	७	सख	सखे
८	१०	मध्यरात्र	मध्यरात्रे
८	२३	किल ।	किल
८	२३	प्रत्यब्रवीत् सः ।	प्रत्यब्रवीत् ।
९	२२	सव	सर्वे
९	२५	सप्तपातालेष	सप्तपातालेषु
१०	१०	षड्जन	षड्जेन
१०	२१	पाण्डित्यं सर्वेषां सुकरं नृणाम् ।	पाण्डित्यम्.... ।
११	२	आयुष्मान्	**शालेय** :– आयुष्मान्
१४	२३	प्रवेष्टुम	प्रवेष्टुम्

पृष्ठम्	पंक्तिः	विद्यमानम्	इष्टम्
१४	२५	अलमनया करुण्या	अलं करुणया ।
१५	८	वणयितुम्	वर्णयितुम्
१६	२	कामतृप्तय	कामतृप्तये
१६	६	तदलम् अतिविस्तरेण	तदलं विस्तरेण
१६	१३	मरणसमय	मरणसमये
१८	९	त्रस्तपिशाच	पीडितात्मन्
२२	३	द्रष्टुमर्हतः	द्रष्टुमर्हथः
२४	१५	तदपि तया समग्रं	तदपि समग्रं
२८	१२	परं	वयस्यौ,
२८	३६	अवधीरितं	अवधारितं
२९	२६	तत्र सर्वेऽपि	सर्वेऽपि
३३	२३	कुमारः	कुमाराय
३५	६	कामार्तस्य	कामार्तः
३५	१६	अमात्यदुहिता स्मरति	स्मरति अमात्यदुहिता
३५	२२	समर्पितंम्	समर्पितम्
३६	३	ते शीलम्	शीलम्
३६	६	सौन्दय	सौन्दर्यं
३६	१६	अन्यथा	अन्यथा गान्धारी भूत्वा
३६	२६	दुग	दुर्गं
३७	१	अयं ते शापः भविष्यति,	अयं मे शापः,
३७	२२	गात्रमभूत्	गात्रम्,
४५	२७	ग्रीवा, किन्तु	ग्रीवा, किन्तु अयं
४६	१६	मम शरीरम् आविशतु ।	आविशतु मम शरीरम् ।
४६	१८	**वेशः**	**प्रवेशः**
४७	२५	स्वग	स्वर्गं
५१	५-६	मम हृदयं विध्यन्ति	विध्यन्ति मम हृदयम् ।
५४	६	गम्यताम् ।	गम्यताम् । (निष्क्रान्तौ उभौ)

पृष्ठम्	पंक्तिः	विद्यमानम्	इष्टम्
५४	६	अहो अत्याहितम् ।	किंचिदत्याहितम् ।
५४	११	ब्रह्महल्या	ब्रह्महत्या
५४	२७	कलेवरम	कलेवरम्
५५	१४	कायसिद्धिं	कार्यसिद्धिं
५७	१०	तेन	का गतिः ?
५८	२४	मन्त्रथिष्यति	मन्त्रयिष्यते
६१	६	अमात्यपुत्रः शोभसे	शोभसे अमात्यपुत्रः ।
६२	२८	यत	यत्
६६	४	दैवायत्त	दैवायत्ते
७२	९	शैत्यन	शैत्येन
७२	२७	खड्गयुद्ध	खड्गयुद्धे
७३	१	जष्यति	जेष्यति